ओषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितीः पुनः ॥

ओषध्यो व्रीहियवाद्याः, पशवश्छागाद्याः, वृक्षा यूपाद्यर्थाः, तिर्यञ्चः कूर्मादयः, पक्षिणः कपिञ्जलाद्याः, यज्ञार्थं विनाशं गताः पुनर्जात्युत्कर्षं प्राप्नुवन्ति ॥

मधुपर्के च यज्ञे च पितृदैवतकर्मणि ।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ॥
एष्वर्थेषु पशून् हिंसन् वेदतत्त्वार्थविद् द्विजः ।
आत्मानं च पशुं चैव गमयत्युत्तमां गतिम् ॥
गृहे गुरावरण्ये वा निवसन्नात्मवान् द्विजः ।
नावेदविहितां हिंसामापद्यपि समाचरेत् ॥
या वेदविहिता हिंसा नियतास्मिंश्चराचरे ।
अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ ॥

मनु ५.४०-४४

पितृदेवतातिथिपूजायामप्येव पशुं हिंस्यादिति मानवम् । अथापि ब्राह्मणाय राजन्याय चाभ्यागताय महोक्षं महाजं वा पचेदेवमस्मा आतिथ्यं कुर्वन्ति ।

वसिष्ठ ४.५.८ (कृत्यकल्पतरु ३.३२८)

नात्मार्थं पाचयेदन्नं नात्मार्थं घातयेत् पशून् ।
देवार्थे ब्राह्मणार्थे वा पचमानो न लिप्यते ॥

यमपैठीनसी (कृत्यकल्पतरु ३.३२८)

प्राणात्यये तथा श्राद्धे प्रोक्षिते द्विजकाम्यया ।
देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभाक् ॥

अन्नाभावेन व्याध्यभिभवेन वा मांसभक्षणमन्तरेण यदा प्राणबाधा भवति तदा मांसं नियमेन भक्षयेत् । 'सर्वत एवात्मानं गोपायेत्' इत्यात्मरक्षाविधानात् । 'तस्मादु ह न पुरायुषः स्वःकामी प्रेयाद्' इति मरणनिषेधाच्च । तथा श्राद्धे मांसं निमन्त्रितो नियमेन भक्षयेत् । अभक्षणे दोषश्रवणात् ।

यथाविधि नियुक्तस्तु यो मांसं नात्ति मानवः ।
स प्रेत्य पशुतां याति संभवानेकविंशतिम् ॥

इति मनुस्मरणात् । प्रोक्षणाख्यश्रौतसंस्कारसंस्कृत्य पशोर्यागार्थस्याग्नीषोमीयादेर्हुतावशिष्टं मांसं प्रोक्षितं तद्भक्षयेत् । अभक्षणे यागानिष्पत्तेः । द्विजकाम्या ब्राह्मणभोजनार्थं देवपित्रर्थं च यत् साधितं तेन तानभ्यर्च्यावशिष्टं भक्षयन्न दोषभाग्भवति । एवं भृत्यभरणावशिष्टमपि ।

यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः ।
भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत् पुरा ॥

इति मनु (५.२२) स्मरणात् । न दोषभागिति दोषाभावमात्रं वदता अतिथ्याद्यर्चनावशिष्टस्याभ्यनुज्ञामात्रं न प्रोक्षितादिवन्नियम इति दर्शितम् । एवमप्रतिषिद्धानामपि शशादीनां प्राणात्ययव्यतिरेकेणाभक्ष्यत्वावगमात् शूद्रस्यापि मांसप्रतिबद्धः सर्वविधिनिषेधाधिकारोऽवगम्यते ॥

इदानीं प्रोक्षिताव्यतिरिक्तस्य वृथामांसमित्यनेन प्रतिषिद्धस्य भक्षणे निन्दार्थवादमाह—

वसेत् स नरके घोरे दिनानि पशुरोमभिः ।
संमितानि दुराचारो यो हन्त्यविधिना पशून् ॥

याज्ञवल्क्य १.८.१७८-१८०

३३. क—देव । पूजा । ग लोन्तार में देवपूजा शब्द है ।

व्रतिशासन में आए हुए ये चार नाम अर्थात् देवपूजा, पितृपूजा, अतिथिपूजा, और बलिकर्मपूजा (ग—भूतपूजा) स्मृतिग्रन्थों में वर्णित पञ्चमहायज्ञ के अन्तर्गत मिलते हैं ।

गौतम ५.३ का 'देवपितृमनुष्यभूतर्षिपूजकः' सूत्र कृत्यकल्पतरु ३.१४१ ने वैश्वदेवादिपञ्चयज्ञविधि के अन्तर्गत लिया है । इसी प्रकार अन्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थों में भी—

गृहीताग्निहोत्रो देवपितृऋष्यतिथ्यभ्यागत-भृत्यात्मपूजनं सुचरित्रानुष्ठानं च कुर्वीत ।

देवल (कृत्यकल्पतरु ३.१४२)

अहन्यहनि कर्तव्यं पितृदैवतपूजनम् ।
हन्तेति हन्तकारं च मनुष्येभ्यो हि पावनम् ॥

जाबालि (कृत्यकल्पतरु ३.१४३)

देवभूतपितृब्रह्ममनुष्याणामनुक्रमात् ।
महासत्त्राणि जानीयात्त एवेह महामखाः ॥

छन्दोगपरिशिष्टे कात्यायनः २.२६ (कृत्य-कल्पतरु ३.१४५)

देवान् पितॄन् ऋषींश्चैव भूतानि ब्राह्मणांस्तथा ।
तर्पयन् विधिना विप्रो ब्रह्मभूयाय कल्पते ॥

हारीत (कृत्यकल्पतरु ३.१४८)

ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा ।
नृयज्ञं पितृयज्ञं च यथाशक्ति न हापयेत् ॥

मनु ४.२१ (कृत्यकल्पतरु ३.१५०)

देवभूतपितृब्रह्ममनुष्याणामनुक्रमात् ।
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥

छन्दोगपरिशिष्ट (वीरमित्रोदय २.३९०)

कुनं इकं यज्ञ लिम प्रत्येकन्य । ल्विर्न्य—देवयज्ञ, ऋषियज्ञ, पितृयज्ञ, भूतयज्ञ, मानुषयज्ञ । नहन् तं पञ्चयज्ञ रिं लोक । देवयज्ञ ङरन्य तैल प्व क्रम रि भटार शिवाग्नि । मकग्लरन् इं मण्डल रिं भटार । येक देवयज्ञ ङरन्य । ऋषियज्ञ ङरन्य कपूजन सं पण्डित म्वं सं व्रुः रि कलिङन् इं ददि व्वं । य ऋषियज्ञ ङरन्य । पितृयज्ञ ङरन्य तिलुमन् ब्वत् ह्यं शिवश्राद्ध । येक पितृयज्ञ ङरन्य । भूतयज्ञ ङरन्य तवुर् म्वं कपूजान् इं तुवुः अद पमुङवन् कुण्ड वुलन् मकादि बलिकर्म । येक एकादश देवतामण्डल । य भूतयज्ञ ङरन्य । अवेः अमङन् इं करमन् । य मानुषयज्ञ ङरन्य । इक त लिमं विजि रि स्डं निं लोकाचार मङभ्यास इक मकभेद लिम ।

अगस्त्यपर्व (BKI. Deel 90, 1933 में प्रा. खोण्डा द्वारा सम्पादित, पृ.३५६)

पञ्चयज्ञातिरिक्त देवपूजा का विभिन्न ग्रन्थों में विस्तृत वर्णन है । वीरमित्रोदय २.३८१... में देवपूजा निम्न ग्रन्थों से उद्धृत है—यम, ब्रह्मपुराण, शातातप, कालिकापुराण, मनु, भविष्यपुराण, नृसिंहपुराण । ऋग्वेदीयब्रह्मकर्मसमुच्चय २०.१६... में भी देवपूजा वर्णित है । हिरण्यकेशीय नित्यविधि में देवपूजा पृ.१४-२८ पर वर्णित है ।

३४. घ में नहीं है । यह शब्द ONW. में आदिपर्व २७ से उद्धृत है ।

कृत्यकल्पतरु ३.११०... में तर्पणविधि निम्न ग्रन्थों से दी गई है—विष्णु, याज्ञवल्क्य, शातातप, छन्दोगपरिशिष्ट, कात्यायन, पद्मपुराण, विष्णु-पुराण, बौधायन, शङ्ख, मरीचि, पैठीनसि, हारीत, यम, उशनाः और नृसिंहपुराण ।

३५. ONW. में अतिथिपूजा शब्द नहीं है । पञ्चयज्ञातिरिक्त अतिथिपूजा का विधान कृत्यकल्प-तरु ३.१७५-२१७ में विभिन्न ग्रन्थों से उद्धृत है—वसिष्ठ, मनु, शङ्खलिखितौ, हारीत, आपस्तम्ब, गौतम, विष्णु, पैठीनसि, याज्ञवल्क्य, बौधायन, शातातप, पराशर, दक्ष, यम, बृहस्पति, देवल, बुध, मार्कण्डेयपुराण, भविष्यपुराण और जाबालि ।

३६. क घ में 'बलिकर्मपूजा' पाठ है, किन्तु ग में इसके स्थान पर 'भूतपूजा' है । ONW. में न तो बलिकर्म शब्द है, और न ही बलिकर्मपूजा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

और भूतपूजा। वहां केवल 'भूतयज्ञ' शब्द अगस्त्य-पर्व १२ से उद्धृत है।

पञ्चमहायज्ञ में से एक भूतयज्ञ है जिसमें शास्त्रों ने बलि का विशेषरूपेण विधान किया है। ऋग्वेदीय ब्रह्मकर्मसमुच्चय ३० में प्रातः और सायं बलि किस प्रकार से दी जानी चाहिए यह सारणी द्वारा प्रदर्शित किया गया है।

३७. यज्ञ के लिए की गई हिंसा अहिंसा है। संस्कृत स्मृतियों के अनुसार इससे दोष नहीं लगता—

या वेदविहिता हिंसा नियतास्मिंश्चराचरे।
अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ॥

मनु ५.४४

३८. क—हिङ्गनन्।

३९. क—हितिक्।

अगस्त्यपर्व पृ.३५७ से इस स्थल की तुलना की जा सकती है।

४०. ख—व्दुस्।

याज्ञवल्क्य ५.१०९ में महाज का विधान मिलता है — महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्।

तत्राश्वमेषछागमहिषस्वमांसानामुत्तरोत्तरप्राशस्त्यं फलविशेषश्चान्यतोवसेयः।

निर्णयसिन्धु १८४

४१. क—मिषा, ग—महिष, घ—मेष। महिष का मेष रूपान्तर इस प्रकार हुआ है—महिष> मइष (हि और इ कवि में उच्चारणवश परिवर्त्य हैं)>मेष (सन्धि द्वारा)।

४२. क—हंसयोग्यनिका।

४३. ग—मत्स्य। सावकन्य।

४४. ग—ङुनियुनिन्।

४५. क—यन् मङ्कन।

४६. क—सयोग्य।

४७: घ—हिङ्गन्।

४८-४८. घ में नहीं है।

४९. घ—°विकारकारण।

५०. घ—ततिङ्गि।

५१. घ—ञमुक्।

५२. क में नहीं है।

५३. क—पनहुत्न्य।

५४. क—मम्जह°, ख—मम्दह°।

५५-५५. क में नहीं है। संभवतः दृष्टिप्लुति के कारण यह पाठ छूट गया है।

५६. इस प्रसंग की निम्न से तुलना कीजिए—

उद्यतानां तु पापानां हन्तुर्दोषो न विद्यते।
निवृत्तानां तथारम्भाद् ग्रहणं न वधः स्मृतः॥

वीरमित्रोदय ७.१९

ज्ञात्वा तु घातकं सम्यक् ससहायं सबान्धवम्।
हन्याच्चित्रैर्वधोपायैरुद्वेजनकरैर्नृपः॥

व्यास (कृत्यकल्पतरु १२.५७५)

पुरुषाणां कुलीनानां नारीणां च विशेषतः।
मुख्यानां चैव रत्नानां हरणे वधमर्हति॥

मनु ८.३२३

मनुष्यहारिणो राज्ञा दग्धव्यास्तु कटाग्निना।

बृहस्पति (कृत्यकल्पतरु १२.५२८)

चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः।

याज्ञवल्क्य २.२७० (कृत्यकल्पतरु १२.५४०)

प्रणष्टाधिगतं द्रव्यं तिष्ठेद्युक्तैरधिष्ठितम्।
यांस्तत्र चौरान् गृह्णीयात्तान् राजेभेन घातयेत्॥

मनु ८.३४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५७. क—आत्मराक्षन, घ—°रक्षक ।

निम्न से इस स्थल की तुलना कीजिए—

आततायिवधे दोषाभावप्रतिपादनं तु कथञ्चिदन्यथात्मरक्षणासम्भवे आततायिवधमात्मरक्षार्थं कुर्वतोऽनपराधत्वाद्राजदण्डाभावमात्रपरमर्थशास्त्रत्वाद् दुर्बलमित्युदाहरणमर्थशास्त्रधर्मशास्त्रयोर्विरोधस्याहुः ।

आत्मनश्च परित्राणे दक्षिणानां च सङ्गरे ।
स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति ॥

आत्मरक्षणे दक्षिणादीनां यज्ञोपकरणानां च रक्षणे युद्धे च स्त्रीविप्रानुग्रहनिमित्तं चाततायिनमकूटशस्त्रेण घ्नन् न दोषभागिति ।.....

आततायिवधे दोषाभावश्च पलायनादिना केनापि प्रकारान्तरेणात्मरक्षणसम्भवे बोध्यः ।

वीरमित्रोदय ७.१५, १६

नाततायिवधे हन्ता किल्बिषं प्राप्नुयात् क्वचित् ।
विनाशार्थिनमायान्तं घातयन्नापराध्नुयात् ॥

शूलपाणि (वीरमित्रोदय ७.१८)

सर्वत आत्मानं गोपायेत् ...(वीरमित्रोदय ७.१८)

५८. क—दोनिर यन् ।

५९-५९. क—हमत्यननयिरिय, ख—हमग्वननहिरिय ।

६०. क—भयनि ।

६१. क—कसिकॅप् ।

६२. क—कतल्यन्, ख—कगल्यन् । यहां पर कतल्यन् और कसिकॅप् का विपर्यय होगया है ।

६३. क—हम्जहकन ।

६४. क—योग्यनिका ।

६५. क—प्वं ।

६६. क में नहीं है ।

६७. क—पत्यनिर ।

६८. क—रिं ।

६९. क—सव्यक्ति ।

७०. क—कमिर, ख—कमिरकिर ।

७१-७१. क—मकोन्कोनन सिर म्जयन । ख—मकोन्कोनन सिराम्जहन ।

७२. क—यन् ।

७३. क—प्रियवक् ।

७४. क—पन् ।

७५. क—सिर यन् ।

७६. क—यि, ख—हि ।

७७. क—पत्यनिर ।

७८. तुलना कीजिए—

आततायिनमायान्तमपि वेदान्तगं रणे ।
जिघांसन्तं जिघांसीयन्न तेन ब्रह्महा भवेत् ॥

वीरमित्रोदय ७.१४

नाततायिवधे दोषो हन्तुर्भवति कश्चन ।
प्रच्छन्नं वा प्रकाशं वा मन्युस्तं मन्युमृच्छति ॥

मनु ८.३५१

७९. घ—दुर्शिल । व्यभिचारिणी के लिए निम्न दण्ड उल्लिखित हैं—

व्यभिचारे स्त्रिया मौण्ड्यमधःशयनमेव च ।
कदन्नं च कुवासश्च कर्म चावकरोज्झनम् ।

नारद (वीरमित्रोदय ७.४१०)

विप्रदुष्टां स्त्रियं भर्ता निरुन्ध्यादेकवेश्मनि ।
यत् पुंसः परदारेषु तच्चैनां चारयेद् व्रतम् ॥

विशेषेण प्रदुष्टाम् । इच्छया व्यभिचारिणीमित्यर्थः ।

मनु ११.१७६

मनु के ११.१७० श्लोक की टीका में पुरुष के

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिए निम्न प्रायश्चित्त लिखा है—अत एव

रेतः सिक्त्वा कुमारीषु चण्डालीष्वन्त्यजासु च ।
सपिण्डापत्यदारेषु प्राणत्यागो विधीयते ॥
विप्रदुष्टां स्त्रियं चैव पुरुषघ्नीमगर्भिणीम् ।
सेतुभेदकरीं चाप्सु शिलां बद्ध्वा प्रवेशयेत् ॥
याज्ञवल्क्य २.२३.२७८

सजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः ।
प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनम् ॥
याज्ञवल्क्य २.२४.२८६

८०. घ—पुत्र । इस प्रसंग के लिए वीरमित्रोदय ७.४०३ देखिए ।

८१. क—नि ।

८२-८२. क—आम्जहिरिय ।

८३. क—सिर यन् ।

८४. क—स्डॅन्यन् ।

८५. क—कस्रग ।

८६-८६. क—अम्जहिय ।

८७. क—विघनि, ख—वियनि ।

८८. क—चिह्नपलन् ।

८९. क—हृष्ट ।

९०. क—य ।

९१. क—रि ।

९२. क—कद्ग ।

९३. निम्नलिखित से तुलना कीजिए—

आत्मनश्च परित्राणे दक्षिणानां च सङ्गरे ।
स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति ॥
मनु ८.३४९

मनु ८.३५० पर कुल्लूकभट्ट की टीका में कई स्थल उद्धृत हैं— ...अत एवोशनाः

गृहीतशस्त्रमाततायिनं हत्वा न दोषः ।

कात्यायनश्च भृगुशब्दोल्लेखेन मनूक्तश्लोकमेव व्यक्तं व्याख्यातवान्—

आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः ।
वधस्तत्र तु नैव स्यात् पापं हीने वधो भृगुः ॥

मेधातिथि-गोविन्दराजौ तु—

स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति ।

९४. क—°नि ।

९५. क—हिनिङ्गकन् ।

९६. क—हं° ।

९७. क—नि ।

९८-९८. क—त्यन्त निं तन् ।

९९. क—संस्कर मुवः ।

१००. घ—ङ ।

१०१. क—कराक्षलं° ।

१०२. क—°ब्रतह ।

१०३. श्लोकान्तर में भी ये शुक्ल°, शबल°, और कृष्ण-ब्रह्मचारी प्रथम श्लोक की कवि टीका में आए हैं । यहां ब्रह्मचारी का अर्थ ब्राह्मण है । व्रतिशासन में इनका क्रम कुछ भिन्न हो गया है—शुक्ल°, कृष्ण° और शबल° । एतत्संबन्धी विस्तृत विवेचन श्लोकान्तर पृ.६-१२ में देखिए । विष्णु-संहिता में तीन प्रकार के और हारीत में चार प्रकार के गृहस्थ आए हैं—

अथ गृहाश्रमिणस्त्रिविधोऽर्थो भवति । **शुक्लः शबलोऽसितश्च** । शुक्लेनार्थेन यदौर्ध्वदैहिकं करोति तद्देवत्वमासाद्याश्नाति । यच्छबलेन तन्मानुष्यम् । यत् कृष्णेन तत् तिर्यक्त्वम् । वृत्त्युपात्तं सर्वमेव शुक्लम् । अनन्तरवृत्त्युपात्तं शबलम् । अन्तरितवृत्त्युपात्तमनुत्तमवृत्त्युपात्तं च कृष्णम् ।

क्रमागतं प्रीतिदायः प्राप्तं च सह भार्यया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अविशेषेण सर्वेषां धनं शुक्लमुदाहृतम् ॥
उत्कोचशुल्कसंप्राप्तमविक्रेयस्य विक्रयात् ।
कृतोपकारादाप्तं च शबलं समुदाहृतम् ॥
पार्श्चिकं द्यूतचौर्याप्तं प्रतिरूपकसाहसैः ।
व्याजेनोपार्जितं यच्च तत् कृष्णं समुदाहृतम् ॥

विष्णु ५८.१-११ (धर्मशास्त्र २.६२१)

ब्रह्मचर्यं नाम दिव्यमानुषीणां तथा चित्रार्थकाष्ठपोतस्थमृण्मयादीनामप्यप्रार्थनमस्मरणमसङ्कल्पनमनभिप्रेक्षणमसङ्कीर्तनमनभिभाषणमनभिगमनमसंदर्शनमसमागमश्चासाम् । तच्च ब्रह्मचर्यं चतुर्विधं भवति । तत्र* परदारवर्जनं नित्यम् । स्वदाराभिगमनं **कृष्णम्** । पर्वनियमवर्जं **रक्तम्** । ऋतुकालाभिगमनं **शुक्लम्** । ऊर्ध्वरेतस्त्वं **विमलम्** । एवं ह्याह—

कृष्णेनेमं जयेल्लोकं मध्यं रक्तेन वै जयेत् ।
शुक्लेन तु जयेत् स्वर्गं विमलान्मोक्षमाप्नुयात् ॥

[*कृष्णं रक्तं शुक्लं विमलमिति—गृ.र. ५२४, शुक्लं, कृष्णं, रक्तं विमलमिति ना.को. च.]

हारीत (कृत्यकल्पतरु २.३२७)

नारद ने शुद्ध (पा. शुक्ल), शबल, और कृष्ण कर्मों का उल्लेख किया है—

धनमूलाः क्रियाः सर्वा यत्नस्तस्यार्जने मतः ।
रक्षणं वर्धनं भोगस्त्रयः तस्य विधिः क्रमात् ॥
तत् पुनस्त्रिविधं ज्ञेयं **शुद्धं शबलमेव** च ।
कृष्णं च तस्य विज्ञेयो विभागः सप्तधा पुनः ॥

[शुक्लमिति वैजयन्ती पाठः]

श्रुतशौर्यतपःकन्याशिष्ययाज्यान्वयागतम् ।
धनं सप्तविधं शुद्धमुदयो यस्य तद्विधः ॥
कुसीदकृषिवाणिज्यशुल्कशिल्पानुवृत्तिभिः ।
कृतोपकारादाप्तं च शबलं समुदाहृतम् ॥
पार्श्चिकद्यूतचौर्यातिप्रतिरूपकसाहसैः ।
व्याजेनोपार्जितं यच्च तत् कृष्णं समुदाहृतम् ॥

नारद ४.४३-४८ (कृत्यकल्पतरु २.२६०)

संस्कृत स्मृतियों के अनुसार उपरिलिखित वर्गीकरण निम्न हैं—

विष्णु—शुक्ल, शबल, कृष्ण ।
हारीत—कृष्ण, रक्त, शुक्ल, विमल ।
नारद—शुद्ध (पा. शुक्ल), शबल, कृष्ण ।

१०४. घ में नहीं है ।

१०५–१०५. क—सङ्कन्नरय् ।

१०६. घ—तृष्ण° । श्लोकान्तर १ में शुक्लब्रह्मचारी की व्याख्या व्रतिशासन की व्याख्या से कुछ विस्तृत है, किन्तु आशय एक ही है ।

व्रतिशासन की अपेक्षा श्लोकान्तर में वर्णानुसार अधिक युक्त क्रम है, वहां शुक्ल°, शबल°, कृष्ण° आए हैं । व्रतिशासन में कृष्ण° श्लोकान्तर के शबल के समान, और शबल कृष्ण के समान है । श्लोकान्तर की व्याख्या व्रतिशासन की अपेक्षा अधिक प्राचीन है जब कि शब्दों के अनुसार उनकी व्याख्याएं भी ठीक बैठ जाती हैं ।

१०७. क—तन् ।

१०८. क—स्डङि (पॅपॅत्-रहित है) ।

१०९. संस्कारज्ञानवारि से गुरु शिष्य का अज्ञानरूपी तम हर लेता है—

अज्ञानपङ्कदिग्धं वै गुरुः शिष्यं तमोहतम् ।
द्रुतं प्रक्षालयति [च] संस्कारज्ञानवारिणा ॥
ऋचं वापदि वार्धर्चं पादं वा यदि वाक्षरम् ।
सकाशाद्यदि गृह्णीयान्नियतं तत्र गौरवम् ॥
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाध्यापयति नाधीते परनीयेषु वर्तते ।
इत्येतैर्लक्षणैर्युक्तस्त्यक्तव्यो व्रतिना गुरुः ॥
सम्यक्प्रवृत्तं तु गुरुं शिष्यो यस्त्ववमन्यते ।
हरते दुष्कृतं चास्य तिर्यग्योनिं च गच्छति ॥
हारीत (कृत्यकल्पतरु १.२२३)

लौकिकं वैदिकं चैव तथाध्यात्मिकमेव च ।
आददीत यतो ज्ञानं तं न द्रुह्येत् कदाचन ॥
विष्णु ३०.४३ (कृत्यकल्पतरु १.२२४)

११०. क—म्वं ।

१११. क—अम्रि ।

११२. क—वालविद्य ।

११३. क—सष्टिनिर ।

११४. क—सेष्टि ।

११५. इस वाक्य का सार यह है कि—जब व्रती गृहस्थ बनने की अवस्था को प्राप्त कर ले तब वह एक पत्नी से विवाह कर सकता है। हमारे यहां भी ब्रह्मचर्य की अवधि निश्चित की गई है, यथा कृत्यकल्पतरु १.२६३... में—

देवलः

अतः परमष्टाचत्वारिंशद्वार्षिकीं वेदचर्यामधितिष्ठेत् ।
अशक्तश्चेद्वार्षिकीं चतुर्विंशतिवार्षिकीं द्वादशवार्षिकीं वा ॥

बौधायनः १.२.१-६

अष्टाचत्वारिंशद्वर्षाणि पौराणं वेदब्रह्मचर्यम् । चतुर्विंशतिं द्वादश वा प्रतिवेदम् । संवत्सरार्धं वा प्रतिकाण्डम् । ग्रहणान्तं वा । जीवितस्यास्थिरत्वात् । कृष्णकेशोऽग्नीनादधीतेति श्रुतेः ॥

याज्ञवल्क्यः १.३६

प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा ।
ग्रहणान्तिकमित्येके केशान्तश्चैव षोडशे ॥

११६. क—मरबि ।

११७. क—मुवः ।

११८. क—य त ।

११९. घ—तृष्ण° ।

१२०-१२०. क—कुनङि ।

१२१. क—कगृहस्थनन् । ONW. में गृहस्थ का कोई कवि अभिसर्गयुक्त रूप नहीं है।

१२२. तुलना कीजिए—

विभागशीलता यस्य क्षमायुक्तो दयालुकः ।
गृहस्थस्तु समाख्यातो न गृहेण गृही भवेत् ॥
दया लज्जा धृतिः श्रद्धा प्रज्ञा त्यागः कृतज्ञता ।
एते यस्य गुणाः सन्ति गृहस्थो मुक्त उच्यते ॥
दक्ष (कृत्यकल्पतरु २.२९१)

१२३. क—°न ।

१२४. क—°शन्तन ।

१२५. क—न्द ।

१२६. क—पुत्र (म- आदिसर्ग से विहीन रूप) ।

१२७. क—तुवि ।

१२८. क—पसङ्गमन ।

१२९-१२९. क—सिनङ्गमनिका ।

१३०-१३०. क—तन् तम्तम रिं सङ्गम सिर ।

१३१. क—श° ।

१३२. क—°शक्तनिकं ।

१३३. संस्कृत साहित्य में से कुछ समस्थल नीचे तुलना-हेतु दिए जा रहे हैं—

दश कामसमुत्थानि तथाऽष्टौ क्रोधजानि च ।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः ।
वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ॥
मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत् कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥
मनु ७.४५, ४६, ४७, ५०

कामं कामयमानस्य यदा कामः समृध्यते ।
अथैनमपरः कामस्तृष्णा विध्यति बाणवत् ॥
महाभारत १३.४४४३ (Ind. Spr. 3902)

कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं पश्य हि कोऽहम् ।
आत्मज्ञानविहीनाः मूढास्ते पच्यन्ते नरके गूढाः ॥
मोहमुद्गर (Ind. Spr. 3903)

नास्ति कामसमो व्याधिर्नास्ति मोहसमो रिपुः ।
नास्ति कोपसमो वह्निर्नास्ति ज्ञानात् परं सुखम् ॥
चाणक्यनीतिदर्पण ५.१२, Ind. Spr. 4446

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तदेतत् त्रितयं त्यजेत् ॥
विष्णु ३३.६ (कृत्यकल्पतरु २.३८५)

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते ॥
क्रोधाद्भवति संमोहः संमोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥
भगवद्गीता २.६२, ६३

१३४. पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥
दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा ॥
मनु ७.४८, ५१

कृत्यकल्पतरु २.३८२...में 'क्रोधादीनां वर्जनम्' नामक पूरा प्रकरण है । इसमें आपस्तम्ब, हारीत, विष्णु, जाबाल, मनु, देवल आदि उद्धृत हैं ।

१३५. कवि भाषा के ग्रन्थ सारसमुच्चय ४६४ के अनुसार महाग्राह-रूपी लोभ से पाप की प्रवृत्ति, पाप से अधर्माप्ति, और अधर्माप्ति से दुःख प्राप्त होता है । अगले श्लोक (४६५) में लोभ को पापों का अधिष्ठान कहा है । श्लोक ४६६ में लोभ से इन्द्रियविभ्रम और उससे प्रज्ञा का नाश बताया गया है । संस्कृत साहित्य में भी लोभ से अनेक अवाञ्छनीय परिणामों का उद्भव वर्णित है, यथा--

लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥
हितोपदेश १.२४ (Ind. Spr. 2687)

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः ॥
हितोपदेश १.१३३ (Ind. Spr. 2690)

लोभात् क्रोधः प्रभवति लोभात् कामः प्रवर्तते ।
लोभान्मोहश्च माया च मानस्तम्भः परासुता ॥
महाभारत १२.५८८० (Ind. Spr. 4960)

१३६. देवल (कृत्यकल्पतरु २.३८७) में मोह को सब पापों का संभव बताया है—

तेषां च त्रिविधो मोहः संभवः सर्वपाप्मनाम् ।

१३७. क—म° ।
१३८. क—मतङ्चन् ।
१३९. क—ङुनियुनि ।
१४०. क—उ° ।
१४१. क—शक्ति रिं, ख—शक्त रिं ।
१४२. क—°म्य° ।
१४३. अगम्यागमन पर अनेक ग्रन्थों

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

में विचार किया गया है, यथा—मनु, शातातप (धर्मशास्त्र १.३२४...), कूर्मपुराण, ब्रह्माण्डपुराण, विष्णुपुराण, पद्मपुराण, गरुडपुराण। इस पर प्रा. खोण्डा ने अगस्त्यपर्व पृ.१६१ पर टिप्पण दिया है। अगस्त्यपर्व पृ.२५ पर अगम्यागमन की व्याख्या आदि निम्न प्रकार से है—कुनं इकं व्वं त्लॅहॅन्, गिम्बॅलॅन्, व्वहॅन्, अगम्यागमन ङरनिक, ददि मलुंगुः रिकं प्रसिद्ध लिनरङन् सं पण्डित, मकपङड कशक्तिन्य वीर्यन्य, मसन्य। इक त व्वं मङ्कन तन् ब्रुः रिं पंक्तिक्रम, येक मङ्कन जन्मन्य।

मनु और याज्ञवल्क्य के अनुसार अगम्यागमन—

एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः।
अगम्यागमनीयं तु व्रतैरेभिरपानुदेत् ॥
गुरुतल्पव्रतं कुर्याद्रेतः सिक्त्वा स्वयोनिषु।
सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च ॥
पैतृष्वसेयीं भगिनीं स्वस्त्रीयां मातुरेव च।
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणं चरेत् ॥
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान्।
ज्ञातित्वेनानुपेयास्ताः पतति ह्युपयन्नधः ॥
अमानुषीषु पुरुष उदक्यायामयोनिषु।
रेतः सिक्त्वा जले चैव कृच्छ्रं सांतपनं चरेत् ॥

मनु ११.१६९-१७३

सखिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च।
सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतम् ॥
पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि।
मातुः सपत्नीं भगिनीमाचार्यतनयां तथा ॥
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः।
लिङ्गं छित्त्वा वधस्तस्य सकामाया स्त्रिया अपि ॥

याज्ञवल्क्य ३.२३१-२३३

शातातपसंहिता में अगम्यागमन-प्रायश्चित्त नामक पूरा पांचवां अध्याय है। कुछ दर्शनीय है—

मातृगामी भवेद्यस्तु लिङ्गं तस्य विनश्यति।
चण्डालीगमने चैव हीनकोषः प्रजायते ॥ १ ॥
गुरुजायाभिगमनान्मूत्रकृच्छ्रः प्रजायते।
तेनापि निष्कृतिः कार्या शास्त्रदृष्टेन कर्मणा ॥ ८ ॥
स्वसुतागमने चैव रक्तकुष्ठं प्रजायते।
भगिनीगमने चैव पीतकुष्ठं प्रजायते ॥ १५ ॥
भ्रातृभार्याभिगमनाद्गलत्कुष्ठं प्रजायते।
स्ववधूगमने चैव कृष्णकुष्ठं प्रजायते ॥ २२ ॥

शातातप (धर्मशास्त्र १.३२४...)

१४४. क—पकस्त्र्य।

१४५. क—कप्वानकन्।

१४६. क—वं।

१४७. क—तं।

१४८. क—रिं।

१४९. स्मृतियों में परदारसेवन की भर्त्सना की गई है तथा उसे निकृष्ट कर्म कहा गया है। कृत्यकल्पतरु २.४१२ में परदारादिवर्जन नामक प्रकरण देखिए।

मनुः

न हीदृशमनायुष्यं लोके किंचन विद्यते।
यादृशं पुरुषस्येह परदारोपसेवनम् ॥

व्यासः

स्वकर्मनिरतो नित्यं स्वदारनिरतो भवेत्।
सेवनात् परकीयानां नरको दारकर्मणाम् ॥

उशनाः—नान्यपत्नीमभिगच्छेत्।

यमः—परदारान्न सेवेत।

देवलः—अगम्यागमनमपचारः। परभार्या तु वर्णोत्तमा स्वसा दुहिता सगोत्रा चण्डाली पतिता प्रव्रजिता तिर्यग्योन्यश्चागम्याः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारसमुच्चय ८२ में तीन कर्मों को वर्ज्य कहा है—

प्राणातिपातः स्तैन्यं च परदारमथापि च ।
त्रीणि पापानि कायेन सर्वतः परिवर्जयेत् ॥

निहन् यं तन् उलहक्न । स्यमतिमति मङहल-हल् । सि परदारा । नहन् तं त्लु तन् उलहक्न रिं असिं रिं परिहास । रिं आपत्काल । रि पङिप्यन् तुवि सिङ्गहन जुगेक ॥

परदारान् परद्रव्यं परीवादं परस्य च ।
परिहासं गुरोः स्थाने चापल्यं च विवर्जयेत् ॥

चाणक्य ३० (Ind. Spr. 1698)

གཞན་གྱི་རས་དང་གཞན་གྱི་གོས།
གཞན་གྱི་མལ་དང་གཞན་བྱད་མེད།
གཞན་གྱི་ཕྱིམ་དུ་གནས་བྱེད་པ།
བཀྲ་ཤིས་ཡང་ནི་དལལ་ཅམས་འགྱུར ||

भोट चाणक्यराजनीतिशास्त्र (तंजूर) ८.४

१५०. क—इक ।

१५१. क—वुरुं ।

१५२-१५२. क—सं ह्यं यम ।

१५३. क—ङ्कें ।

१५४. क—सकेलिकेलिनिं ।

१५५. क में अधिक पाठ है—लृविः त पातक निं गुर्वङ्गनागम । सकेकेलि निं रात् पिनकत्महन्य ।

१५६. क—तॅतॅक् ।

१५७. क—केकेलिकिं ।

१५८. क—पया ।

१५९. स्मृतियों के अनुसार गुर्वङ्गनागमन महापातक माना गया है तथा उसके लिए कठोरतम प्रायश्चित्त है, यथा—

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥

मनु ११.५४

एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः ।
गुरुस्त्रीगमनीयं तु व्रतैरेभिरपानुदेत् ॥
गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये ।
सूर्मीं ज्वलन्तीं वाश्लिष्येन्मृत्युना स विशुध्यति ॥

मनु ११.१०२, १०३

१६०. क में 'जजमहन्' पाठ है । ONW. में जमः के एक रूप 'पजमहन्' का अर्थ 'उप-पत्नी' है जो कि इस प्रसंग में ठीक बैठता है । 'जमःजमहन्' रूप ONW. में नहीं है ।

१६१-१६१. क में अधिक पाठ है—म्वङद्व रिं सं गुरु । म्वं तन् पङिरिं वचन निं सं गुरु ।

१६२. क—पन्तॅन् कङतकितकि ।

१६३. क में यमव्रतय पाठ है, तत्पश्चात् विराम नहीं है ।

१६४. सारसमुच्चय ८१ में चार प्रकार के वचन वर्जित हैं—

असत्प्रलापं पारुष्यं पैशुन्यमनृतं तथा ।
चत्वारि वाचा राजेन्द्र न जल्पेन्नानुचिन्तयेत् ॥

न्यं तन् प्रवृत्त्यनिं वाक् । पात् क्वेःन्य । प्रत्येकन्य । उजर् अहल । उजर् अपृगस् । उजर् पिशुन । उजर् मिथ्या । नहन् तं पात् सिङ्गहन निं वाक् । तन् उजरक्न । तन् अङॅनङॅनन् कोजरन्य ॥

सारसमुच्चय १३८-१४० में सत्य की परि-भाषा सुन्दर ढंग से की गई है—

सत्यां वाचमहिंसां च वदेदपरिवादिनीम् ।
कल्योपेतामपरुषामनृशंसामपैशुनाम् ॥

कुनॅ ल्विर् इङुजरक्न निहन् । सत्य त य । ह्यव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त य मकावक् हिङ्गा । हय्व मकावक् उपॅत । हितावसान त य । हय्व त पारुष्य । हय्व कस्लतन् ग्लूं । हय्व नृशंस । हय्व पैशुन्य । मङ्कन ल्विर् निं तन् योग्य उजरक्न ।

दृष्टानुभूतमर्थं यः पृष्टो न विनिगूहते ।
यथाभूतप्रवादित्वादित्येतत् सत्यलक्षणम् ॥

निहन् लक्षण निं सत्य । हन य तिनञान् ततन् पवुनि । मजर् त य । यथाभूत । तोरसि इकं सकव्रुःन्य । प्रवृत्तिन्य इक मङ्कन । य तिक लक्षण निं कसत्यन् ॥

न तथ्यवचनं सत्यं नातथ्यवचनं मृषा ।
यद् भूतहितमत्यर्थं तत् सत्यमितरं मृषा ॥

कुनॅं परमार्थन्य निहन् । तन् इकं उजर् अद्वा क्तिकं मिथ्या ङरन्य । तन् इकं सि तुहु सत्य ङरन्य । कुनॅं प्रसिद्धन्य । मोन् मिथ्या इकं उजर् । त्हॅर् मंदे हित जुग । मगवे सुखावसान रिं सर्वभाव । य सत्य ङरनिक । मोन् यथाभूत तोवि । य[न्] तन् पंदे सुखावसान रिं सर्वभाव । मिथ्या ङरनिक ॥

योगसूत्र २.३६ में सत्य की व्याख्या बहुत संक्षिप्त एवं यथार्थ रूप में की गई है । उसके ऊपर की गई टीकाएं एवं भाष्य अपनी विशिष्ट व्याख्याओं के लिए दर्शनीय हैं ।

१६५. क में सत्य के स्थान पर 'हत्गुः' पाठ है । इससे सम्पूर्ण वाक्य का यह अर्थ 'व्रती वचन में दृढ रहे' होगा ।

१६६. क—हुवुस् ।

१६७-१६७. क—व्दि निरन् तुहु ।

१६८. क—मुजरक्न° ।

१६९. क—अदुलुरन् ।

१७०. क—य° ।

१७१. क—शपत ।

कृत्यकल्पतरु २.३०५ में सत्यमहिमा निरूपित है ।

हारीतः

आत्मा सन्नस्यैषा वाक् सती यया वदति यत्सतः ।... यथाग्निः घृताहुतिहुतो दीप्यते, एवं सत्याभिधाप्यात्मा ब्रह्मान्नदत्तमाप्ति प्रतिवदन् दीपयति । अथ यथाद्भिरग्नि ध्वंसयंस्तमांसि प्रतिपद्यते, एवमनृतं ध्रुवं वदन् तमांसि प्रतिपद्यते, तस्मान्नानृतं ब्रूयात् ।

मनुयमौ

सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥

स्मृतिचन्द्रिका १.१४ में व्यासोक्त सनातन धर्म में सत्य सर्वप्रथम आया है एवं उसके उपरान्त दम, तप, शौच, संतोष, ह्री, क्षमा, आर्जव, ज्ञान, शम, दया, ध्यान हैं । वहीं पर—

सत्यं भूतहितं प्रोक्तं मनसो दमनं दमः ।
तपः स्वधर्मवर्तित्वं शौचं सङ्करवर्जनम् ॥

१७२. क में इसके पश्चात् कुछ अतिरिक्त पाठ है—च । य वचन निं (ख—सं) गुरु त्लस् कहिरिं दे निर ।

१७३. क—°नि ।

१७४. घ में नहीं है ।

१७५. क—पङङॅनिर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[illegible]

[illegible] ॥

[illegible] ॥

५

[1]नरवानरगोव्याघ्रा[2] गजाश्वश्वानगर्दभाः[3] ।
कुक्कुटसूकरसिंहाः[4] सर्वमचोक्षमांसकम् ॥५॥

कद्यङ्ग[5] नि दगिङि वों । दगिङि व्रे । दगिङि सपि । [6]दगिङि मचन्[6] । दगिङि लिमन्[7] । दगिङि जरन् । दगिङि असु[8] । दगिङि गर्दभ । दगिङि तेतेप्-उमः[9] । दगिङि चेलें-उमः । दगिङि सिंह । इक त कवेः इनरन्[10] अचोक्ष[11] मांस[12] ॥

मनुष्य का मांस, बन्दर का मांस, गाय का मांस, व्याघ्र का मांस, हाथी का मांस, अश्व का मांस, श्वान का मांस, गर्दभ का मांस, गृहकुक्कुट का मांस, गृहसूकर का मांस, सिंह का मांस—ये सब अचोक्ष मांस कहे गए हैं ॥

---

१. संस्कृत स्मृति-साहित्य में अभक्ष्य मांस का अनेक स्थलों पर विस्तृत निरूपण है। नीचे कुछ प्रमुख स्थल दिए जा रहे हैं।

क्रव्यादाञ्छकुनान् सर्वांस्तथा ग्रामनिवासिनः ।
अनिर्दिष्टांश्चैकशफांष्टिट्टिभं च विवर्जयेत् ॥
कलविङ्कं प्लवं हंसं चक्राह्वं ग्रामकुक्कुटम् ।
सारसं रज्जुदालं च दात्यूहं शुकसारिके ॥
प्रतुदाञ्जालपादांश्च कोयष्टिनखविष्किरान् ।
निमज्जतश्च मत्स्यादान् सौनं वल्लूरमेव च ॥
बकं चैव बलाकां च काकोलं खञ्जरीटकम् ।
मत्स्यादान् विड्वराहांश्च मत्स्यानेव च सर्वशः ॥
यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान् विवर्जयेत् ॥
पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्वशः ॥

क्रव्यादाः मांसाशिनो गृध्रादयः। ग्रामनिवासिनः पारावतादयः। अत्रोभयत्र शकुनीति संबध्यते। अनिर्दिष्टान् श्रुतौ भक्ष्यत्वेनाकथितान्। श्रुतौ हि केचिन् क्वचिद् भक्ष्यत्वेनैकशफा निर्दिष्टाः। यथा त्वाष्ट्रं वाडवमालभेत तस्य च मांसमश्नीयाद् इति। अतो क्वचिद्यज्ञे श्रुत्या भक्ष्यत्वेनोक्तास्ते तद्दर्शनेनान्यत्रापि न भक्षणीयाः। तेषामेकशफानामन्यत्रापि भक्ष्यत्वेनानिर्देशात्। कलविङ्कः ग्रामचटकः। तस्य च ग्राम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवासित्वेन निषेधे सिद्धे पुनर्ग्रामवचनं ग्रामारण्योभयनिवासित्वादारण्यस्यापि निषेधार्थम्। प्लवः प्लवनेनैव य आहारं प्राप्नोति। रज्जुदालः काष्ठकुट्टकः। दात्यूहः कालकण्ठः डाडक इति प्रसिद्धः। प्रतुदा ये चञ्च्वा प्रतुद्य भक्षयन्ति। जालपादाः आट्यादयः। कोयष्टिः पक्षिविशेषः। नखविष्किराः नखैर्विकीर्य ये भक्षयन्ति। निमज्जन्तो मत्स्यादाः मद्गुप्रभृतयः। सौनं सूनास्थानसंभवं मांसम्। वल्लूरं शुष्कमांसम्। काकोलो द्रोणकाकः। मत्स्यादाः नक्रादयः।

मनु ५.११-१६ और उस पर कृत्यकल्पतरु से टीका

न भक्षयेदेकचरानज्ञातांश्च मृगद्विजान्।
भक्ष्येष्वपि समुद्दिष्टान् सर्वान् पञ्चनखांस्तथा॥
श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः॥
छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनं चैव मत्स्या जग्ध्वा पतेद्द्विजः॥

मनु ५.१७-१९ (११-१६ कृत्यकल्पतरु ३.२९८, वीरमित्रोदय २.५४०, १५ कृत्यकल्पतरु ३.३०८, वीरमित्रोदय २.५४६, १६ वीरमित्रोदय २.५४७, १७ वीरमित्रोदय २.५४४, १८ कृत्यकल्पतरु ३.३०७, वीरमित्रोदय २.५४५)

मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च।
श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत्॥
घृतकुम्भं वराहे तु तिलद्रोणं तु तित्तिरौ।
शुके द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम्॥
हत्वा हंसं बलाकां च बकं बर्हिणमेव च।
वानरं श्येनभासौ च स्पर्शयेद्ब्राह्मणाय गाम्॥
वासो दद्याद्वयं हत्वा पञ्च नीलान् वृषान् गजम्।
अजमेषावनड्वाहं खरं हत्वैकहायनम्॥
क्रव्यादांस्तु मृगान् हत्वा धेनुं दद्यात् पयस्विनीम्।
अक्रव्यादान् वत्सतरीमुष्ट्रं हत्वा तु कृष्णलम्॥

मनु ११.१३१, १३४-१३७

क्रव्यादपक्षिदात्यूहशुकप्रतुदटिट्टिभान्।
सारसैकशफान् हंसान् सर्वांश्च ग्रामवासिनः॥
कोयष्टिप्लवचक्राह्ववलाकाबकविष्किरान्।
वृथाकृसरसंयावपायसाऽपूपशष्कुलीः॥
कलविङ्कं सकाकोलं कुररं रज्जुदालकम्।
जालपादान् खञ्जरीटानज्ञातांश्च मृगद्विजान्॥
चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च।
मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्॥
पलाण्डुं विड्वराहं च छत्राकं ग्रामकुक्कुटम्।
लशुनं गृञ्जनं चैव जग्ध्वा चान्द्रायणं चरेत्॥
भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्लकाः।
शशश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः॥
तथा पाठीनराजीवसशल्काश्च द्विजातिभिः।

याज्ञवल्क्य १.१७२-१७८ (कृत्यकल्पतरु ३.२९९, वीरमित्रोदय २.५४१, ५४७)

मार्जारगोधानकुलमण्डूकांश्च पतत्रिणः।
हत्वा त्र्यहं पिबेत् क्षीरं कृच्छ्रं वा पादिकं चरेत्॥
गजे नीलवृषाः पञ्च शुके वत्सो द्विहायनः।
खराजमेषेषु वृषो देयः क्रौञ्चे त्रिहायनः॥
हंसश्येनकपिक्रव्याज्जलस्थलशिखण्डिनः।
भासं च हत्वा दद्याद्गामक्रव्यादस्तु वत्सिकाम्॥
उरगेष्वायसो दण्डः पण्डके त्रपु सोसकम्।
कोले घृतघटो देय उष्ट्रे गुञ्जा हयेंऽशुकम्॥
तित्तिरौ तु तिलद्रोणं गजादीनामशक्नुवत्।
दानं दातुं चरेत् कृच्छ्रमेकैकस्य विशुद्धये॥

याज्ञवल्क्य ३.२७०-२७४

पञ्चनखानां गोधाकच्छपश्वाविच्छल्यकखड्गशशपूतिखषवर्जम्। अभक्ष्यश्चेटो मत्स्यानाम्। सर्पशीर्षो मुदरः क्रव्यादो ये चान्ये विकृतास्या यथा मनुष्यशिरसः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वावित् सेधा। शल्यकः शल्यसहितः सेधासदृशः प्राणिविशेषः। पूतिखषो हिमवति प्रसिद्ध इति कपर्दी॥ सर्पशीर्षः सर्पस्येव शिरो यस्य। मुदरो मकरः। क्रव्यादो ये प्रायेण मांसमश्नन्ति नक्रादयः॥

आपस्तम्ब १.१७.३७-३९ (कृत्यकल्पतरु ३.३०६, ३०८)

पञ्चनखा वानरादयः। तेषां मध्ये गोधादीन् वर्जयित्वा अन्ये पञ्चनखा अभक्ष्याः। गोधा कृकलासाकृतिर्महाकाया। कच्छपः कूर्मः। श्वाविट् वराहविशेषः। शल्यकः यस्य चर्मणा तनुत्राणं क्रियत इति उज्ज्वलाकारः। कल्पतरौ तु श्वाविच्छल्लक इति पाठः। तदा श्वावित् सेधा शल्लकस्तत्सदृशः प्राणिविशेषः। पूतिखगः हिमवति प्रसिद्ध इति कपर्दी। चेटो मत्स्यविशेषः। सर्पशीर्षः सर्पस्येव शीर्षं यस्य स इत्यर्थः। मुदरः मकरः। ये च क्रव्यमेवादन्ति शिशुमारादयः। ये चान्ये विकृतास्यास्तत्रोदाहरणं यथा मनुष्यशिरसः जलमनुष्याः॥ (वीरमित्रोदय २.५४५, ५४६)

कुक्कुटो विष्किराणाम्। प्लवः प्रतुदाम्। क्रव्यादः। हंससारसचक्रवाकसुपर्णाश्च। क्रुञ्चक्रौञ्चवार्ध्राणसलक्ष्मणवर्ज्यम्।

आपस्तम्ब १.१७.३२-३६ (कृत्यकल्पतरु ३.३०२)

मण्डूकं नकुलं काकं विड्वराहं च मूषिकम्।
श्वानं हत्वा द्विजः कुर्यात् षोडशाख्यमहाव्रतम्।
पयः पिबेत् त्रिरात्रं तु श्वानं हत्वा त्वतन्द्रितः॥ ७॥
मार्जारं चाथ नकुलं योजनं वाध्वनो व्रजेत्।
कृच्छ्रं द्वादशमात्रं तु कुर्यादश्ववधे द्विजः॥ ८॥
अथ कृष्णायसीं दद्यात् सर्पं हत्वा द्विजोत्तमः।
वलाकं रङ्कवं चैव मूषिकं कृतलम्भकम्॥ ९॥
वराहं तु तिलद्रोणं तिलाटं चैव तित्तिरिम्।
शुकं द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम्॥ १०
हत्वा हंसं वलाकं च बकटिट्टिभमेव च।
वानरंचैव भासं च स्वयं वा ब्राह्मणाय गाम्॥ ११
क्रव्यादांस्तु मृगान् हत्वा धेनुं दद्यात् पयस्विनीम्।
अक्रव्यादं वत्सतरमुष्ट्रं हत्वा तु कृष्णलम्॥ १२॥
नकुलोलूकमार्जारं जग्ध्वा सान्तपनं चरेत्।
श्वानं जग्ध्वाथ कृच्छ्रेण शुभक्षणेच शुध्यति॥ २३
प्रकुर्याच्चैव संस्कारं पूर्वेणैव विधानतः।
शललश्च बलाकं च हंसकारण्डवं तथा॥ २४॥
चक्रवाकं च जग्ध्वा च द्वादशाहमभोजनम्।
कपोतं टिट्टिभं भासं शुकं सारसमेव च॥ २५॥
जलूकां जालपादं च जग्ध्वा ह्येतद्व्रतं चरेत्।
शिशुमारं तथा माषं मत्स्यं मांसं तथैव च॥ २६
जग्ध्वा चैव वराहं च एतदेव व्रतं चरेत्।
कोकिलं चैव मत्स्यादं मण्डूकं भुजगं तथा॥ २७
गोमूत्रयावकाहारैर्मासेनैकेन शुध्यति।
जलेचरांश्च जलजान् यातुधानविपाटितान्॥ २८
रक्तपादांस्तथा जग्ध्वा सप्ताहं चैतदाचरेत्।
मृतमांसं वृथा चैवमात्मार्थं वा यथाकृतम्॥ २९
भुक्त्वा समाचरेदेतत्तत्पापस्यापनुत्तये।
कपोतं कुञ्जरं शिग्रूं कुक्कुटं रजकां तथा॥ ३०
प्राजापत्यं चरेज्जग्ध्वा तथा कुम्भीरमेव च।

उशनाः ९.७-१२, २३-३०
(धर्मशास्त्र १.१५६)

उभयतोदन्तकेश्यलोमैकशफकलविङ्कप्लवचक्रवाकहंसाः। काककङ्कगृध्रश्येना जलजा रक्तपादतुण्डा ग्राम्यकुक्कुटसूकराः। अपन्नदद्वसन्नवृथामांसानि। निचुदारुबकबलाकाशुकमद्गुटिट्टिभमान्धालनक्तंचरा अभक्ष्याः। भक्ष्याः प्रतुदविष्किरा जालपादाः। मत्स्याश्चाविकृताः।

उभयतोदन्तः मनुष्यः। केशी चमरी। अलोमाः सर्पा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दयः। अपन्नदत् यत्स्वभावतो दन्ता न पतन्ति तावद्भक्ष्योऽप्यभक्ष्यः। अवसन्नो व्याधिग्लानः। वृथामांसं यद्देवपित्र्याद्युद्देशेन न पच्यते। (कृत्यकल्पतरु)

जलजा अपि पक्षिण एव। काकादिसंनिधानात्। तेषां च विशेषणं रक्तपादतुण्डा इति। ग्राम्य इति चोत्तरयोर्विशेषणम्। अभक्ष्या इति वक्ष्यमाणेन संबन्धः॥ अपन्नदन् यावत् स्वभावतो दन्ता न पतन्ति तावद्भक्ष्योऽप्यभक्ष्यः। अवसन्नो व्याधितः। वृथामांसं यद् देवपित्राद्युद्देशेन न पच्यते॥ निचुदारः दार्वाघाटः। प्रतुदादीनामभक्ष्यत्वेनोक्तानां पुनर्भक्ष्यत्वेनाभ्यनुज्ञानमापद्विषयमिति हरदत्तः॥ (वीरमित्रोदय)

गौतम १७.२६, २७, २९, ३२-३४ (कृत्यकल्पतरु ३.३०१. ३०४; वीरमित्रोदय २.५४२, ५४३, ५४४)

बलाकाहंसदात्यूहभृङ्गराजकचित्रकाः।
उलूककुररश्येनगृध्रकुक्कुटवायसाः॥
चकोरः कोकिलो रज्जुः कुटिलश्चाषमद्गुकौ।
कङ्कः साखणो भासः शतपत्रप्लवङ्गमाः॥
उत्क्रोशो बर्हिणः क्रौञ्चश्चक्रवाकः शिलीमुखः।
पारावतकपोतौ चाभक्ष्या पक्षिगणाः स्मृताः॥
अभक्ष्याः पशुजातीनां गोखरोष्ट्राश्वकुञ्जराः।
सिंहव्याघ्रर्क्षशरभाः सर्पाजगरजालकाः॥
आखुमूषिकमार्जारनकुलग्रामसूकराः।
श्वशृगालमृगद्वीपिगोलाङ्गूलनृमर्कटाः॥
शम्बूकः शुक्तिर्नखशुक्तिः शिशुमारः प्लवङ्गमः।
मत्स्याश्च विकृताकारा नैव भक्ष्या जलौकसाम्॥

भृङ्गराजो धृत्राटः धनच्छुआ इति प्रसिद्धः। चित्रकश्चित्रकपोतः। कङ्को लोहितपत्रः। ऋक्षो भल्लूकः। शरभोऽष्टपदः। अजगरः सर्पविशेषः। आखुर्महातुन्दुरुः। मूषिकोऽत्र स्वल्पमूषिकः। द्वीपी चित्रकः। गोलाङ्गूलः कृष्णमुखो वानरः। ना मनुष्यः। मर्कटो वानरः। नखशुक्तिर्दीर्घशुक्तिका। प्लवङ्गमो मण्डूकः। (कृत्यकल्पतरु) भृङ्गराजस्तेनैव नाम्ना प्रसिद्धः। चित्रकश्चित्रकपोतः। उलूकः कौशिकः। मुद्गको जलकाकः। कङ्को लोहितपत्रः। भासो गृध्रविशेषः। प्लवङ्गमो मण्डूकः। अजगरः सर्पविशेषः। आखुः स्थूलोन्दुरुः। मूषिकोऽत्र स्वल्पमूषिकः। नकुलो बभ्रुः। शृगालो जम्बूकः। कपिः प्लवङ्गः। द्वीपी महाव्याघ्रः। गोलाङ्गूलः कृष्णमुखो वानरः। मर्कटो गौरवानरः। शम्बुकः प्रसिद्धः। नखशुक्तिर्दीर्घशुक्तिका। प्लवङ्गमो मण्डूकः।

देवल (कृत्यकल्पतरु ३.३००, ३०३, ३१०; वीरमित्रोदय २.५४१, ५४३, ५४७)

मृगपक्षिणां क्रव्यादांश्च वर्जयेत्। सर्वमांसादानां यावन्तस्तथोक्तास्तावन्तोऽभक्ष्याः॥ ग्राम्याख्याश्चतुर्दश। गौरविरजोऽश्वोऽश्वतरो गर्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः। पक्षिवानरमहिषसरीसृपरुरुवृषतमृगाश्चेति सप्तारण्याः पशवः॥ कुलीरवार्ताकपृतनजलानर्तक्षिप्रगाश्चेत्यभक्ष्याः। (शल्कैर्युक्तामत्स्या भक्ष्या इतरे त्वभक्ष्याः) सर्पशीर्षा विकृतमुखाश्च॥

पैठीनसि (कृत्यकल्पतरु ३.३०४, ३०८, ३०९, वीरमित्रोदय २.५४६, ५४७)

भक्ष्याः श्वाविड्गोधाशशकशल्यककच्छपखड्गाः खड्गवर्जाः पञ्चनखाः। पक्षिणस्तित्तिरिकपोतकपिञ्जलवार्ध्राणसतृणमयूरवारणा वारणवर्जाः पञ्च विष्किराः। मत्स्याः सहस्रदंष्ट्रश्चिलिचिमो वर्मी बृहच्छिरो-रोमशकरिरोहितराजीवाः।

बौधायन १.१२.५, ७, ८ (कृत्यकल्पतरु ३०७, ३०३, ३१०, वीरमित्रोदय ५४५ में 'खड्गवर्जाः पञ्चनखाः' के स्थान पर 'पञ्च पञ्चनखाः' पाठ है)

आजं गव्यं च यन्मासं मायूरं च विवर्जयेत्।

महाभारत (कृत्यकल्पतरु ३.३०७, वीरमित्रोदय २.५४५—'मायूरं' के स्थान पर 'मसूरं' है)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अभक्ष्या' इत्यनुवृत्तौ यमः—कलविङ्कप्लवचक्रवाकहंसभाससारसा ये चान्ये प्रतुदा विष्किरा जालपादा रक्तपादाः कोयष्टिकाः ॥

छत्राकं विड्वराहं च जालपादांश्च कुक्कुटान् ।
भक्षयित्वा पतेद्विप्रो योऽपि स्यात् सर्ववेदवित् ॥
गवाश्वं गर्दभोष्ट्रं च श्वशृगालं तथैव च ।
विष्किरान् प्रतुदान् भुक्त्वा सद्यः पतति वै द्विजः ॥

अभक्ष्या मकरसर्पसरीसृपमद्गुमयूरवर्मिकनक्रकर्कटशिशुमाराः । ये चान्ये हयकर्णिकाः । ये चान्येऽशल्का मत्स्या उभयकास्याः । मत्स्यानशल्यकान् सर्वान् वेदाध्यायी विवर्जयेत् ॥

सर्पोऽत्र जलसर्पो डुण्डुभः । सरीसृपोऽत्र जलौकाः । मद्गुः जलकाकः । मयूरोऽत्र जलचरो मयूरसदृशः पक्षी । वर्मिकः स्वल्पसर्पसदृशो मत्स्यः । उभयकास्याः उभयतोमुखाः । (कृत्यकल्पतरु)

पूर्वस्य मत्स्यप्रतिषेधविधेरर्थवादोऽयं मत्स्यानेव च सर्वश इत्यस्य ।

यम (कृत्यकल्पतरु ३.३०२, ३०४, ३०९, वीरमित्रोदय २.५४४, ५४६)

श्वाविच्छल्लकशशकच्छपगोधाः पञ्चनखा नाभक्ष्याः, अनुष्ट्राः पशूनामन्यतोदतश्च मत्स्यानां वा वेहगवयशिशुमारनक्रकुलीरा विकृतरूपाः सर्पशीर्षाश्च । गौरगवयशरभाजाश्च अनुदिष्टास्तथा। धेन्वनड्वाहावापन्नदन्ताश्च । भक्ष्यौ धेन्वनड्वाहौ मेध्यौ वाजसनेयके विज्ञायते । खड्गे तु विवदन्त्यग्राम्यसूकरे च । शकुनानां विधुनविष्किरजालपादाः कलविङ्कप्लवहंसचक्रवाकभासवायसपारावताः कुक्कुटसारङ्गाः पाण्डुकपोतक्रौञ्चक्रकरबकबलाकामद्गुटिट्टिभमान्धालनक्तंचरादार्वाघाटकचातकतैलातकहारीतकखञ्जरीटग्राम्यकुक्कुटशुकसारिकाकोकिलक्रव्यादो ग्रामोपचारिणश्च ।

गौरोऽश्वसदृश आरण्यपशुः । मेध्यौ मेधो यज्ञस्तदङ्गभूतौ। खड्गे च विवदन्त्यग्राम्यसूकरे च इति, खड्गग्राम्यसूकरयोः केचिन्मुनयो भक्ष्यत्वं वदन्ति, केचिच्चाभक्ष्यत्वम्। ततश्च विकल्पः। स च श्राद्धनियुक्तानि युक्ततया व्यवस्थितः । विधुनोतीति विधुनः। भासस्तल्लचरो गृध्रविशेषः । सारङ्गो मृगः। क्रकरः कृकलासः । मान्धालो वाग्गुदः। नक्तंचरा उलूकादयः। दार्वाघाटः काष्ठकुट्टकः। हारीतको हरितपक्षः कपोताकृतिः। ग्रामोपचारिणो ग्राम एव ये सदा चरन्ति।

वसिष्ठसंहिता १४ (धर्मशास्त्र १.४५३, कृत्यकल्पतरु ३.३०१, ३०५, ३०९; वीरमित्रोदय २.५४२, ५४४, ५४७ में अंशतः उद्धृत)

राजीवाः सिंहतुण्डाश्च सशल्काश्च तथैव च ।
पाठीनरोहितौ वापि भक्ष्या मत्स्येषु कीर्तिताः ॥
तित्तिरं च मयूरं च लावकं च कपिञ्जलम् ।
वार्ध्राणसं वर्तकं च भक्ष्यानाह यमः सदा ॥

शङ्खसंहिता १७.२५, २७ (कृत्यकल्पतरु ३.३१०, ३०३; वीरमित्रोदय २.५४३)

सर्वकार्येष्वसिद्धार्थो गजघाती भवेन्नरः ॥
प्रासादं कारयित्वा तु गणेशप्रतिमां न्यस्येत् ।
गणनाथस्य मन्त्रं तु मन्त्रो लक्षमितं जपेत् ॥
कुलत्थशाकैः पूपैश्च गणशान्तिपुरःसरम् ।
उष्ट्रे विनिहते चैव जायते विकृतस्वरः ॥
स तत्पापविशुद्ध्यर्थं दद्यात् कर्पूरकं फलम् ।
अश्वे विनिहते चैव वक्रतुण्डः प्रजायते ॥
शतं पलानि दद्याच्च चन्दनान्यघनुत्तये ।
महिषीघातने चैव कृष्णगुल्मः प्रजायते ॥
खरे विनिहते चैव खररोमा प्रजायते ।
निष्कत्रयस्य प्रकृतिं संप्रदद्याद्धिरण्मयीम् ॥
तरक्षौ निहते चैव जायते काकरेक्षणः ।
दद्याद्रत्नमयीं धेनुं स तत्पातकशान्तये ॥
शूकरे निहते चैव दन्तुरो जायते नरः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स दद्यात्तु विशुद्ध्यर्थं घृतकुम्भं सदक्षिणम् ॥
हरिणे निहते खञ्जः शृगाले तु विपादकः ।
अश्वस्तेन प्रदातव्यः सौवर्णोपलनिर्मितः ॥
अजाभिघातने चैव अधिकाङ्गः प्रजायते ।
अजा तेन प्रदातव्या विचित्रवस्त्रसंयुता ॥
उरभ्रे निहते चैव पाण्डुरोगः प्रजायते ।
कस्तूरिकापलं दद्याद्ब्राह्मणाय विशुद्धये ॥
मार्जारे निहते चैव पीतपाणिः प्रजायते ।
पारावतं ससौवर्णं प्रदद्यान्निष्कमात्रकम् ॥
शुकसारिकयोर्घाते नरः स्खलितवाग्भवेत् ।
सच्छास्त्रपुस्तकं दद्यात् स विप्राय सदक्षिणम् ॥
बकघाती दीर्घनसो दद्याद्गां धवलप्रभाम् ।
काकघाती कर्णहीनो दद्याद्गामसितप्रभाम् ॥
शातातप २.४३-५६ (धर्मशास्त्र १.३१७, ३१८)

पलाण्डुलशुनं जग्ध्वा तथैव ग्रामकुक्कुटम् ।
छत्राकं विड्वराहं च चरेच्चान्द्रायणं द्विजः ॥
मानवः श्वखरोष्ट्राणां कपेर्गोमायुकङ्कयोः ।
प्राश्य मूत्रं पुरीषं वा चरेच्चान्द्रायणव्रतम् ॥
संवर्तसंहिता १९१, १९२ (धर्मशास्त्र १.२३१)

गजं च तुरगं हत्वा महिषोष्ट्रकपिं तथा ।
एषु कुर्वीत सर्वेषु सप्तरात्रमभोजनम् ॥
व्याघ्रं श्वानं तथा सिंहमृक्षं शूकरमेव च ।
एतान् हत्वा द्विजः कृच्छ्रं ब्राह्मणानां च भोजनम् ॥
हंसं काकं बलाकं च पारावतमथापि वा ।
सारसं चाषभासं च हत्वा त्रिदिवसं क्षिपेत् ॥
चक्रवाकं तथा क्रौञ्चं सारिकाशुकतित्तिरिम् ।
श्येनगृध्रावुलूकं च कपोतकमथापि वा ॥
टिट्टिभं जालपादं च कोकिलं कुक्कुटं तथा ।
एव पक्षिषु सर्वेषु दिनमेकमभोजनम् ॥
मण्डूकं चैव हत्वा च सर्पमार्जारमूषिकम् ।
त्रिरात्रोपोषितस्तिष्ठेत् कुर्याद् ब्राह्मणभोजनम् ॥
संवर्तसंहिता १४१-१४७ (धर्मशास्त्र १.२२७)

ग्राम्यारण्यानां पशूनामश्नन्ति यथाजमेषमहिष-हरिणखड्गरुरुपृषतर्श्यन्यङ्कुमहारण्यवासिनश्च वराहान् । तथा शशकशल्यकसेधागोधाकूर्मवर्तक-तित्तिरिमयूरवार्ध्राणसलावकक्रकरकपिञ्जलान् । सशल्कांश्च मत्स्यान् न्यायोपपन्नान् भक्षयेत् ॥

रुरुर्बहुशाखशृङ्गो मृगः। पृषतो बिन्दुचित्रितो मृगः। ऋश्यो मृदुशृङ्गः रोझ इति प्रसिद्धः। न्यङ्कुः शम्बर-सदृशः शृङ्गरहितः। सेधा शललवती॥

हारीत (कृत्यकल्पतरु ३.३०७, वीरमित्रोदय २.५४५)

व्रश्चनप्रभवं सर्वं हिंगुद्रव्यं विनैव तु ।
भूस्तृणं शिग्रुकं चैव ब्राह्मणो नैव भक्षयेत् ॥
खट्वासंज्ञं च वार्ताकं तथैवोषरजं तृणम् ।
लवणं भूमिजं विप्रो मोहेनापि न भक्षयेत् ॥
नखविष्किरसंज्ञं च तथा कोयष्टिसंज्ञितम् ।
सौलं वल्लूरसंज्ञं च मत्स्यादो नैव भक्षयेत् ॥
बकं चैव बलाकं च खञ्जरीटकसंज्ञितम् ।
कोकिलं च द्विजश्रेष्ठाः प्रमादाच्च न भक्षयेत् ॥
पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ।
राजीवान् सिंहतुण्डांश्च शशकान् नैव भक्षयेत् ॥
केवलानि च शुष्काणि तथा पर्युषितानि च ।
ऋजीषपक्वं विप्रेन्द्रा कदाचिन्नैव भक्षयेत् ॥
विण्मूत्रं च सुरास्पृष्टं सर्वं द्रव्यं तथैव च ।
सुरास्पृष्टस्य च स्पृष्टं ब्राह्मणो नैव भक्षयेत् ॥
रेतोदेहमलं चैव श्वकाकोच्छिष्टमेव च ।
विड्वराहखरोष्ट्राणां मूत्रं विप्रो न भक्षयेत् ॥
विडालकाकाद्युच्छिष्टं नकुलोच्छिष्टमेव च ।
वेदबाह्येन संस्पृष्टं ब्राह्मणो नैव भक्षयेत् ॥
शकुनीसंज्ञितान् सर्वांस्तथा ग्रामनिवासिनः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिर्दिष्टांश्चैकशफान् क्रव्यादांश्च न भक्षयेत् ॥
कलविङ्कसमाख्यं च टिट्टिभं प्लवमेव च ।
हंसं चक्रसमाख्यं च सारसं नैव भक्षयेत् ॥
रज्जुवालं च दात्यूहं शुकं शारीकसंज्ञितम् ।
प्रतुदाञ्जालपादांश्च ब्राह्मणो नैव भक्षयेत् ॥
तुरंगस्य गजस्यापि मण्डूकस्य तथैव च ।
पुरीषं च तथा मूत्रं ब्राह्मणो नैव भक्षयेत् ॥
नराणां च गजानां च मांसमश्वस्य सत्तमाः ।
महिषस्य च मांसं च ब्राह्मणो नैव भक्षयेत् ॥
अजाविमांसं रक्तं च गोमांसं च तथैव च ।
मृगाणां च तथा मांसं ब्राह्मणो नैव भक्षयेत् ॥
मांसं पञ्चनखानां च विनैव सकलानि तु ।
कामतोऽकामतो वापि ब्राह्मणो नैव भक्षयेत् ॥
मत्स्यं कृत्स्नं दृतिस्पृष्टमाज्यं कीलालमेव च ।
रसं तालकस्यापि ब्राह्मणो नैव भक्षयेत् ॥

सूतसंहिता ७३७.२६-४२

अभक्ष्य प्राणियों पर कृत्यकल्पतरु ३.२९८-३११ और वीरमित्रोदय २.५४०-५४८ में पूर्ण प्रकरण हैं । इस विषय पर Journal of the Asiatic Society of Bengal (Letters) vol. XXII(1956) में S. Sen Gupta का Food Prohibition in Smṛti Texts शीर्षक लेख महत्त्वपूर्ण है ।

२. क—°व्याग्रः ।

३. क—गजाश्वस्वनगर्द्धभः ।

४. ख—कूर्कुतसुकरसिङ्हः ।

५. क—कद्यन्यङ्ग ।

६-६. क में 'दगिङि मचन्' नहीं है किन्तु संस्कृत श्लोक में स्पष्टरूपेण व्याघ्र है और घ भी उसकी टीका दे रहा है, इसलिए हमने यह पाठ रख लिया है ।

७. क—गजः ।

८. क—हसु । घ में 'दगिङि असु' नहीं है ।

९. तेतेप्-उमः ONW. में नहीं है । श्री सुधार्थ ने इसका अर्थ domestic rooster किया है । हमारे स्मृति ग्रन्थों में ग्राम्यकुक्कुट विशेष रूप से वर्जनीय है । ग्राम्यसूकर का मांस भी वर्जित है ।

१०. क—इनरनन् ।

११. ONW. में अचोक्ष शब्द उत्तरकाण्ड १०४ से दिया है ।

१२. ख में 'ङ' अधिक है ।

६



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[illegible]

ग्राहश्च[1] कुम्भीरो[2] नक्रो[3] मार्जारो[4] मूषिकस्तथा ।
नकुलो मण्डूको व्यालः सर्वमचोक्षमांसकम् ॥६॥

लवन् त मुवः दगिङि वुहय[5] । दगिङि लोदन् । दगिङि कुलुयु । दगिङि पुस[6] । दगिङि तिकुस् । सल्विरि तिकुस् । दगिङि गरंगरङन् । दगिङि कुवुक् । दगिङि विहुं[7] । सल्विरि विहुं[7] । दगिङि उला । सल्विरि उला । इक त कबेः इनरन्[8] अचोक्ष मांस ॥

पुनरपि ग्राह <वुहय> का मांस, कुम्भीर <लोदन्> का मांस, नक्र <कुलुयु> का मांस, ? <पुस> का मांस, सब प्रकार के चूहों का मांस, नेवले <गरंगरङन्> का मांस, व्याघ्रविडाल <कुवुक्> का मांस, सब प्रकार के मेंडकों का मांस, सब प्रकार के सर्पों का मांस—ये सब अचोक्ष मांस कहे गए हैं ॥

---

१. क घ—गृहस्च ।
२. क घ—कुम्बिर ।
३. क—नक्रः ।
४. क—मरैरः, ख—मर्क्कैरः ।
५. क—हुवय ।
६. क—पुष ।
७. ख—वियुं ।
८. क—इनरनन् ।

७

[illegible]

[illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



[1]भूक्रिमि-भूकीट-मांसं सर्वलोकावहेलितम्[1] ।
[2]प्राणिनां रूपभेदाश्च[2] सर्वं कनिष्ठमांसकम् ॥ ७ ॥

मुवः[3] इकं प्राणी कृमि ङ [4]भूःकृमि ङ[4] कद्यङ्ग निं उलृर् मुङगुः इं लृमः । [5]भूकीट[6] ङ सॅमुत् मोमः रिं ल्मः[5] । लवन् त सल्विरिकं[7] प्राणी कगिलगिल । किनेलिकन्[8] देनिं सर्वलोक । इकं प्राणी भेदरूपन्य । कद्यङ्ग निं लिन्तः, चचिं, कुरिचक्, इरिसिरिस्पोः, उलृर् कव्दिव्दि, सिङ्गत्, इत्येवमादि[9] । तन् किनशृद्धानिं[10] मुलत् ॥ इक त कबेः सिनङ्गः कनिष्ठमांस ङ ॥ कलवनिकं[11] सिनङ्गः चमः । इकं मृग । दे सं सिद्धान्त शुद्धव्रत[12] । कद्यङ्ग निं [13]लुवक्, विङ्गं, लङ्कपन्[14], कॅन्दो, वन्तिरः, वुत्[15], विरोग्, रुति, तलृदु, हुवहुव, वुरङुतन्, कदल्, कररप्, ललवा, तॅकेक्, चॅचॅक्, तिलप्, तुङ्गॅलित्[13] । तन् योग्य इक[16] भक्षन् दे सं सिद्धान्त शुद्धव्रत[12] ॥

पुनरपि कृमि प्राणी अर्थात् भूमि में रहने वाले कीड़े । भूकीट का अर्थ है चींटियां जो भूमि में रहती हैं । तथा अनेक घृणित प्राणी जिन्हें सब लोग घृणा करते हैं । इन प्राणियों के ये रूपभेद हैं— जोंक, कीड़े<चचिं>, ...<कुरिचक्>, घोंघा <इरिसिरिस्पोः>, भयास्पद कीड़े <उलृर् कव्दिव्दि>, ...<सिङ्गत्>, इत्येवमादि । इनको देख कर कोई प्रसन्नता नहीं होती । ये सब कनिष्ठ मांस कहे गए हैं । ये सब मृग आदि के मांस जो शुद्धव्रत सिद्धान्तव्रतियों ने अपवित्र कहे हैं यथा, गिरिकशीका <लुवक्>, ...<विङ्गं>, ...<लङ्कपन्>, ...<कॅन्दो>, ...<वन्तिरः>, गिलहरी<वुत्>, ...<विरोग्>, तृणाञ्जन? <रुति>, बिच्छू? <तलृदु>, ...<हुवहुव>, बन्दर? <वुरङुतन्>, ...<कदल्>, तृणाञ्जन<कररप्>, चमगादड़? <ललवा>, चमगादड़? <तॅकेक्>, बड़ी छिपकली <चॅचॅक्>, गृहगोधिका<तिलप्>, ...<तुङ्गलित्>—ये शुद्धव्रत सिद्धान्तव्रतियों के भक्षण के अयोग्य हैं ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१-१. क—भूःक्रिमिमङ्गकी(ख—कि)तभुः, सर्वलोकोप्रहेलिकः ।

२-२. क—प्रणिनां रूपबेदङ्चा ।

३. क—मुव (सन्धि उल्लेखनीय है) ।

४-४. घ में नहीं है ।

५-५. क में नहीं है ।

६. घ—कितबुः ।

७. क—सल्विरिं ।

८. क—किनेलिकेलिकन् ।

९. क—इत्येमदि ।

१०. क—किनशृद्धनिं व्वं ।

११. क—लवनिकं ।

१२. क—व्रत ।

१३-१३. क में पशुओं के नाम कुछ भिन्न क्रम से आए हैं—लुवक्, विङ्गं, लङ्कपन्, कॅण्ढो, वन्तिरः, वुत्, विरोग्, रुति, वुरङ्गुतन्, ललव, तलृधू, हुवहुव, कघल्, करप्करप्, त्कक्, चॅचॅक्, तिलप्, तुङ्गॅलित् ।

स्मृतियों के अनुसार अभक्ष्य पशुओं की सामग्री श्लोक ५ में दी गई है ।

१४. घ—लकंप ।

१५. घ में नहीं है । ONW. के अनुसार वुत् का अर्थ गिलहरी है ।

१६. क में नहीं है ।

८

[illegible]

[illegible]

[illegible]

[illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



[1]काकोलूक-गृध्र-श्येन-कङ्क-कोकिल-सूचिकाः ।[1]
कीर-शुकाश्च सारिकाः सर्वमचोक्षमांसकम् ॥८॥

कद्यङ्ग निं मनुक् क्रूर[2]पक्षी , गगक्, दोक्[3], अयं बकिकुक्[4], उलुं, त्रिलक्लक्, कक्[5], तुवुतुवु[6], दोम्दोमन्[7], अतत्, स्युं, नोरि[8], चोद्, गगन्द्यन्[9], अलपलप्[10], बिबिदो[11], दर्यस्[12], मनुक् विदु[13]। तन् योग्य भक्षनिक दे सं सिद्धान्त[14] ॥ मुवः[15] नीलपक्षी[16]। म्वं इकं पक्षी नरशब्द[17], कोचि, चंकिलुं,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दॅदॅक्चु[१८], तिकुस्तिकुसन्, जलक्, सल्विरिं जलक्, तेतेक्[१९], सुलिन्दित्[२०]। तन् भक्ष्यनिक [२१]दे सं विकु[२१] ॥

मुवः सल्विरिं सत्त्व पञ्चनख। तन् योग्य भक्षन्[२२]॥ कुनं इकं पञ्चनख[२३] युक्ति भक्षनॅन्, वरक्[२४] लण्डक्[२५], वयवक्[२६], कूर्म, बुलुस्[२७], बनिं[२८], पॅत्रु, सल्विरिं पॅत्रु ॥ मुवः इकं [२९]योग्य भक्षनॅन्। इकं[२९] चेलें अलस्, अयं वन, महिष[३०], वॅडुस्, [३१]बञाक्, इतिक्, दर[३२]। मुवः बुर्वन् [२९]कंयोग्य भक्षनॅनिक[२९]। तिंगिलि, किदं, मञ्जङन्, कञ्चिल्। यप्वन् मनुक् लेन् सकें इनुहुतकॅन् भक्ष्यनॅन[३३] ङूनि। कद्यङ्ग निं मॅरक्, अडव, हिजोवन्, वुरुवुरु, पुरुकुतुत्, त्रगुकु[३४], पुतॅर्। [३५]मुवः इकं योग्य भक्षन् पक्षी[३५]। वलिविस्, बयों[३६], कल्वं, [३७]नहन् आदिन्य ङ योग्य भक्षनॅन्[३७] ॥ इकं इवक्-ल्वः म्वं इवक्-सागर। [३८]योग्यनिक भक्षन्[३८] ॥ न्दतन् मिलु[३९] वुहय। म्वं इकं मीन अत्यन्त रि गॉं। अतिक्रूर रूपन्य। लवन् त मुवः इकं योग्य भक्षनॅन् दे सं सिद्धान्त शुद्धव्रत। इ स्डॅन्यन् इनुलः[४०]। यन् कल्बुवन्[४१] देनिं ललूर्, नमुक्[४२], तिङ्गितिङ्गि[४३], मॅरिंमॅरिं[४४], तुम, कपिञ्जल, चतक्चतक्[४५], लिम्पित्, तॅङु[४६]। चम्पुर् यन् मङ्कन। तन् युक्ति भक्षनॅनिक[४७] ॥

लवन् त मुवः सं सिद्धान्त। हय्व सिर भुक्ति सुरुदन्। सल्विर् निकं[४८] चरु। तुवि तन् पमङन्[४९] सल्विरिं कतुम्पङन् चमः। कहरसें चम्पुर् कुनं। [५०]अपितुवि इकं त्लस् कत्ड देनिं अञ्जि। त्ड देनिं अयम्, कबॅरन् कुनं, यन् कत्ड देनिं चेलें। म्वं हय्व भुक्ति सल्विरिं सिनंशय। चमः शुचि कुनं।[५०] तन् पमलुयन् अत्ड।[५१] मकादि यन् अमङन्[५२] त्ड निं शूद्र, [५३]सल्विर् इकं[५३] व्वं सिनङ्गः जन्म चण्डाल। तोहुतक्न[५४] इक ॥

कुनं यन् [५५]अमङनिकं अनुहुतकॅन्[५५] सलिङि व्रतिशासन। पन्तॅनिक[५६] सं भुजङ्ग यन् मङ्कन ॥ तन् सॅङ्गहॅन् विकु[५७]। यन् अभक्ष-भक्षण। म्वं अपेयपेय[५८] ॥ [५९]अपेयपेय ङ[५९] अङिनुम् तन् योग्य इनुमॅन्। कद्यङ्ग निं त्वक् वरगं[६०], बद्यग्, त्वकिं सवलन्, त्वक् बुदुर्। [६१]येक तन् इनुमॅन् दे सं सिद्धान्त शुद्धव्रत ॥[६१]

कुनं इकं इनुमिनुमनिर[६२]। योग्य केनुम दे सं सिद्धान्तव्रत। बृम्[६३], किलं, मधु, तम्पो[६४], बृम् चिन[६५]। येक व्नं इनुमॅनिर ॥ तथापिन्य यन् चम्पुर् भाजनन्य[६६]। हुवुस् विनडहकॅनिं सजॉं[६७]। तन् योग्य जुग इनुमॅनिर। अपन् कहरसिं चम्पुर् ङ[६८] ॥ कुनं यन् हन सं सिद्धान्तव्रत मिनुमिकं तन् योग्य इनुमॅनिर। यन् मकनिमित्त तन् व्रुः निर यन् चमः। मकावसान व्रुः सिर यन् चम्पुर्। इ व्कसन् मप्रायश्चित्त[६९] त सिर। मनडह प्रायश्चित्त रिं स्वगुरु[७०] ॥ कुनं यन् अलृमॅह प्रायश्चित्त। पन्तॅन् सिर यन् मङ्कन ॥ कुनं यन् मकनिमित्त ङ[७१] मोह मान[७२] मद दे निर मङन् चमः। तन् सङ्कें तन् व्रुः निर। पन्तॅनिक। तन् व्नं तिङ्गलन दे सं विकु। ङूनियूनि[७३] संभाषणन्[७४] दे सं समसम निर ॥ मतंन्यन् प्रयत्नह त सं विकु रि करक्षन्[७५] सं ह्यं सिद्धान्तशासन ॥ मरन् कत्गुः[७६] इकं कसत्यव्रतन्। उमन्तुक्[७७]सिरें परमपद[७७] यन् अपगॅहिं क्रम। तृतीय सं ह्यं यम व्रत ॥

पक्षियों में उदाहरणार्थ क्रूरपक्षी, कौवा, उल्लू <दोक्>, वनकुक्कुट <अयं बकिकुक्>, चील

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भार्यासखीं समारुह्य गत्वा श्यालीं तथैव च ॥
अहोरात्रोषितो भूत्वा तप्तकृच्छ्रं समाचरेत् ।
उशनाः ९.१-५ (धर्मशास्त्र १.१५५)

ये स्थल भी दर्शनीय हैं—आपस्तम्ब-धर्मसूत्र १.९.२७ ११, लघुशातातप १५५=अग्निपुराण १६८.३८, वसिष्ठ २३.४१, विष्णु-धर्मसूत्र ५३.५-६ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८. क—°नि ।
१९. क में अधिक पाठ है—अनक् ।
२०. क—कप्वनकन् ।
२१. क में नहीं है ।
२२. क—इपे ।
२३. क—धं ।
२४.

याज्ञवल्क्य के प्रायश्चित्तप्रकरण में मिताक्षरा टीका ने गुरुतल्पक के लिए विभिन्न लेखकों द्वारा निर्धारित प्रायश्चित्त संगृहीत किए हैं ।

तप्तेऽयःशयने सार्धमायस्या योषिता स्वपेत् ।
गृहीत्वोत्कृत्य वृषणौ नैर्ऋत्यां चोत्सृजेत्तनुम् ॥
प्राजापत्यं चरेत् कृच्छ्रं समो वा गुरुतल्पगः ।
चान्द्रायणं वा त्रीन् मासानभ्यसेद्वेदसंहिताम् ॥

याज्ञवल्क्य ३.२५९-६०

अगस्त्यपर्व पृ.२५ पर भी गुरुतल्पक की व्याख्या है ।

ब्रह्महा सुरापो गुरुतल्पगमातृपितृयोनिसम्बन्धगस्तेननास्तिकनिन्दितकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पातकसंयोजकाश्च तैश्चाब्दं समाचरन् । द्विजातिकर्मभ्यो हानिः पतनं परत्र चासिद्धिस्तामेके नरकम् । त्रीणि प्रथमान्यनिर्देश्यानि मनुर्न स्त्रीष्वगुरुतल्पगः पततीत्येके भ्रूणहनि हीनवर्णसेवायां च स्त्री पतति कौटसाक्ष्यं राजगामिपैशुनं गुरोरनृताभिशंसनं महापातकसमानि ।

गौतमसंहिता २२ (धर्मशास्त्र १.३९६)

माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
दुहिताचार्यभार्या च सगोत्रा शरणागता ।
राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥
आसामन्यतमां गत्वा गुरुतल्पग उच्यते ।
शिश्नस्योत्कर्तनं तत्र नान्यो दण्डो विधीयते ॥

नारद १५.७३-७५ (कृत्यकल्पतरु १२.५८७)

पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि ।
मातुः सपत्नीं भगिनीमाचार्यतनयां तथा ॥
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः ।
छित्त्वा लिङ्गं वधस्तस्य सकामायाः स्त्रियास्तथा ॥

याज्ञवल्क्य ३.२३२, २३३

ब्रह्महत्या सुरापानं ब्राह्मणसुवर्णहरणं गुरुदारगमनमिति महापातकानि । तत्संयोगश्च । संवत्सरेण पतति पतितेन सह चरन् । एकयानभोजनाशनशयनैः । यौनस्त्रौवमौखसम्बन्धात् सद्य एव ।

विष्णुसंहिता २५.१-५ (धर्मशास्त्र २.५९७)

...पितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं गुरुदारगमनसमम् । पितृष्वसृमातृष्वसृस्वसृगमनं च । श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनं च । स्वसुः सख्याः सगोत्राया उत्तमवर्णायाः कुमार्या अन्त्यजाया रजस्वलायाः प्रव्रजिताया निक्षिप्तायाश्च ॥

विष्णुसंहिता ३६.१-७ (धर्मशास्त्र २.५९८)

२५. क—जजमहन् ।
२६. क में अतिरिक्त पाठ—कुनं । अनक्कप्वनकनिर कुनं । मन्तुसङ्गुरु ।
२७-२७. क—मकायमुरुगुल ।
२८. क—सङ्के ।
२९. क—अर्यपचर ।
३०. क—अमुरनॅन् ।
३१-३१. क में नहीं है ।
३२. क—पप ।
३३. क—पङ°
३४. क—शिष्य के पश्चात् दण्ड (।) है ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३५. क—प्वेक ।

३६. क—गुर्वानुग्रह ।

३७-३७. क—समोभयहित म्वं गुरु शिष्य ।

३८. क—पनरिमह ।

३९. क—सल ।

४०. क—ङुनियुनि ।

४१. क—पित्कॅत् ।

४२. क—सङ्के सं ।

४३. ख—पधक्न ।

४४. क—शिष्यत्यन्त ।

४५. क—दुराचर ।

४६. क—स्विकर ।

४७. क—हह्युन् ।

४८. क—मंग्लर ।

४९. घ—°पिदुःख ।

५०. क—सक्षि ।

५१. क—हुनिङे ।

५२. क—ङुनियुनि ।

५३-५३. क—यनावमनहे सङ्गुरु । म्वं तन् पङिरिं सपत्कॅति सङ्गुरु ।

५४. क—पुच्च° ।

५५. क—य ।

५६. क में नहीं है ।

५७-५७. क में उलटे क्रम से हैं—अङॅन्तल्, अम्लगण्डं ।

५८. क—°णं ।

५९. स्मृतिग्रन्थों में स्तेय—

द्विविधांस्तस्करान् विद्यात् परद्रव्यापहारिणः ।
प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः ॥
मनु ९.२५६ (कृत्यकल्पतरु १२.५०७)

प्रकाशाश्चाप्रकाशाश्च तस्करा द्विविधाः स्मृताः ।
सुचिह्नैरेव विज्ञेयाश्चारैस्तस्करवेदिभिः ॥
व्यास (कृत्यकल्पतरु १२.५०७)

प्रकाशाश्चाप्रकाशाश्च तस्करा द्विविधाः स्मृताः ।
प्रज्ञासामर्थ्यमायाभिः प्रभिन्नास्ते सहस्रधा ॥
नैगमा वैद्यकितवा सद्योत्कोचकवञ्चकाः ।
दैवोत्पादविदो भद्राः शिल्पज्ञाः प्रतिरूपकाः ॥
अक्रियाकारिणश्चैव मध्यस्थाः कूटसाक्षिणः ।
प्रकाशतस्करा ह्येते तथा कुहकजीविनः ॥
बृहस्पति २२.१-३ (कृत्यकल्पतरु १२.५०७)

प्रकाशवञ्चकास्तत्र कूटमानतुलाश्रिताः ।
उत्कोचकाः सोपधिका वञ्चकाः पण्ययोषितः ॥
प्रतिरूपकराश्चैव मङ्गलादेशवृत्तयः ।
इत्येवमादयो ज्ञेयाः प्रकाशास्तस्करा भुवि ॥
नारद २१.२, ३ (कृत्यकल्पतरु १२.५०८)

६०. क—षनूततयि । श्लोकान्तर ३२ के अनुसार षडाततायी निम्न हैं—

अग्निदो विषदाथर्वो शस्त्रघ्नो दारातिक्रमः ।
पिशुनस्तत्र तद्राज्ञि षडेते ह्याततायिनः ॥

व्रतिशासन के छः आततायिओं की तुलना एवं है—अन्लुः=अथर्वा, मङुपस्=विषद, अङमुक्=शस्त्रघ्न, अमुरुगुल्=दारातिक्रम, अनुन्वनि=अग्निद, अमिशुनाकॅनि=पिशुन ।

अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥
वसिष्ठ (स्मृतिचन्द्रिका ३.७३१)

उद्यतासिविषाग्निश्च चापोद्यतकरस्तथा ।
आथर्वणेन हन्ता च पिशुनश्चैव राजनि ॥
भार्यातिक्रमकारी च रन्ध्रान्वेषणतत्परः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमाद्यान् विजानीयात् सर्वानेवाततायिनः ॥
यशोवृत्तहरान् पापानाहुर्धर्मार्थहारकान् ।
अनाक्षारितपूर्वो यस्त्वपराधे प्रवर्तते ॥
प्राणद्रव्यापहारे च तं विद्यादाततायिनम् ।

आततायी को मारने से दोष नहीं लगता—

नखिनां शृङ्गिणां चैव दंष्ट्रिणां चाततायिनाम् ।
हस्त्यश्वानां तथान्येषां वधे हन्ता न दोषभाक् ॥

कात्यायन (स्मृतिचन्द्रिका ३.७३१, ७३२)

६१. क—°मू° ।
६२. क—हमुरुगुल् ।
६३-६३. क—यततयि ङरन्य ।
६४. क—अम्पुरन् ।
६५-६५. क—प्रयश्चितन्य ।
६६: क—मुवः ।
६७. क—मरःमरहन ।
६८. क में नहीं है ।
६९. क—मङगुहक्नं ।
७०. क—विशेष ।
७१-७१. क—परमहस्य, घ—पमरः रहस्य ।
७२. स्नान का महत्त्व अवर्णनीय है, यथा—

प्रातरुत्थाय यो विप्रः प्रातःस्नायी भवेत् सदा ।
सप्तजन्मकृतं पापं त्रिभिर्वर्षैर्व्यपोहति ॥
उषस्युषसि यत् स्नानं संध्यायामुदिते रवौ ।
प्राजापत्येन तत् तुल्यं महापातकनाशनम् ॥
तिसृष्वपि च संध्यासु स्नातव्यं च तपस्विभिः ।
गुणा दश स्नानपरस्य साधो
रूपं च तेजश्च बलं च शौचम् ।
आयुष्यमारोग्यमलोलुपत्वं
दुःस्वप्नघातश्च तपश्च मेधा ॥

दक्ष (वीरमित्रोदय २.१३८)

१६



[1]आग्नेयं वारुणं चैव ब्राह्म्यं वायव्यमेव च ।
मानसं पार्थिवं चैव षड्विधं स्नानमुच्यते[1] ॥१६॥[2]

क । नॅम् इकं सिनॅङगुः स्नान ङ । लिं निं[3] पण्डित । ल्विर्न्य निहन् । आग्नेय[4], वारुण[5], ब्राह्म्य[6], वायव्य[7], मानस, पार्थिव । नहन् त ल्विर्न्य नॅम् । कयत्नाक्न[8] ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पण्डितों ने छः प्रकार के स्नान कहे हैं। वे इस प्रकार हैं—आग्नेय, वारुण, ब्राह्म्य, वायव्य, मानस, पार्थिव। इन छः का प्रयत्नपूर्वक पालन करना चाहिए।

१-१. क—

अक्नेयम्बरुणञ्चेव। ब्राह्म्यावायव्यमेव च।
मनसं पार्थिवञ्चेव। षड्विधंस्ननमुच्यते॥

२. व्रतिशासन में आए हुए स्नान संस्कृत साहित्य में संक्षेप से दर्शनीय हैं—

आग्नेय (व्रतिशासन १६)=भस्मस्नान (व्रतिशासन १७), योगियाज्ञवल्क्य, हारीत, गर्ग, नित्यनैमित्तिककर्मसमुच्चय (भस्मस्नान), ऋग्वेदीय ब्रह्मकर्मसमुच्चय ५ (भस्म), वैष्णवाह्निक २६, ऋग्वेदीय नित्यविधि २।

वारुण (व्रतिशासन १६)=जले गाहनं (व्रतिशासन १७), योगियाज्ञवल्क्य, हारीत, शङ्ख (स्मृतिचन्द्रिका २.२९०)।

ब्राह्म्य (व्रतिशासन १६)=मन्त्रतः स्नानं (व्रतिशासन १७), मान्त्र (योगियाज्ञवल्क्य), हारीत, गर्ग, वैष्णवाह्निक २६, रामार्चनचन्द्रिका ४२।

वायव्य (व्रतिशासन १६)=गवां रजः (व्रतिशासन १७), योगियाज्ञवल्क्य, हारीत, गर्ग, बृहस्पति, नित्यनैमित्तिककर्मसमुच्चय।

मानस (व्रतिशासन १६)=जप्यं (व्रतिशासन १८), त्रिसन्ध्योपासन (व्रतिशासन १८)। रामार्चनचन्द्रिका ४२, योगियाज्ञवल्क्य, गर्ग, दक्ष (वीरमित्रोदय २.१३९), दक्ष (वीरमित्रोदय ३.५८), छन्दोगपरिशिष्टे कात्यायनः (वीरमित्रोदय २.२५९), नृसिंहपुराण, ऋग्वेदीयब्रह्मकर्मसमुच्चय ५, वैष्णवाह्निक २६, स्मृतिचन्द्रिका २.४९७(जपयज्ञ)।

पार्थिव (व्रतिशासन १६)=पूर्णतीर्थमृदां स्पर्शः (व्रतिशासन १८), नित्यनैमित्तिककर्मसमुच्चय (मृत्तिकास्नान), वैष्णवाह्निक २६, नित्यनैमित्तिककर्मसमुच्चय पृ.१९।

स्मृति, आह्निक, नित्यकर्मविधि, पुराण एवं अन्य ग्रन्थों में स्नान का विभिन्नरूपेण वर्णन किया है। प्रायः नित्य, नैमित्तिक एवं काम्य भेद किए गए हैं।

व्रतिशासन में छः प्रकार के स्नान आए हैं। ये स्मृतियों तथा आह्निकों के अनुसार गौण स्नानों के अन्तर्गत हैं। इनके लिए कुछ समीपतम समान स्थल नीचे दिए जा रहे हैं।

असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया।
मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः॥
मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च।
वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात्॥
योगियाज्ञवल्क्य (वीरमित्रोदय २.१९५, स्मृतिचन्द्रिका २.३४८)

पञ्च स्नानानि विप्राणां कीर्तितानि मनीषिभिः।
आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च।
हारीत (कृत्यकल्पतरु ३.५१)

दिव्यं वायव्यमाग्नेयं ब्राह्मं सारस्वतं तथा।
मानसं चेति विज्ञेयं गौणस्नानं तु षड्विधम्॥
सरस्वती विदुषां वाक् तया प्राप्तं सारस्वतम्। गर्ग (वीरमित्रोदय २.१९६, स्मृतिचन्द्रिका २.३४८)

नित्यनैमित्तिककर्मसमुच्चय पृ.३४... पर दस स्नान आए हैं—

दशविधस्नानानि। संकल्पः—अद्येत्यादि अस्मिन् अमुकतीर्थे मम देहशुद्ध्यर्थं प्रायश्चित्तांगभूतानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशविधस्नानान्यहं करिष्ये ।। प्रथमं भस्मस्नानम् । द्वितीयं मृत्तिकास्नानम् । तृतीयं गोमयस्नानम् । चतुर्थं पञ्चगव्यस्नानम् । पञ्चमं गोरजस्नानम् । षष्ठं धान्यस्नानम् । सप्तमं फलस्नानम् । अष्टमं सर्वौषधीस्नानम् । नवमं कुशोदकस्नानम् । दशमं हिरण्यस्नानम् ।

नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ।
तर्पणं तु भवेत्तस्य अङ्गत्वेन प्रकीर्तितम् ।।

ब्रह्माण्डपुराण (स्मृतिचन्द्रिका २.२६४)

नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ।
तेषां मध्ये तु यन्नित्यं तत्पुनर्भिद्यते द्विधा ।।
मलापकर्षणं पार्श्वे मन्त्रवत्तु जले स्मृतम् ।
सन्ध्यास्नानमुभाभ्यां तु स्नानदेशाः प्रकीर्तिताः ।।

दक्ष (वीरमित्रोदय २.१३६)

नित्यं सततनिर्वर्त्यं काम्यं कामाय यद्धितम् ।
निमित्तादुपजातं तु स्नानं नैमित्तिकं स्मृतम् ।।

गोभिल (वीरमित्रोदय २.१६०)

स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः ।
तयोस्तु वारुणं मुख्यं तत् पुनष्षड्विधं भवेत् ।।
नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् ।
क्रियास्नानं षष्ठं षोढा स्नानं प्रकीर्तितम् ।।

शङ्ख (स्मृतिचन्द्रिका २.२६०)

स्नानमब्दैवतैर्मन्त्रैर्वारुणैश्च मृदा सह ।
कुर्याद्व्याहृतिभिर्वाथ यत्किंचेदमृचापि वा ।।
द्रुपदादिति वा स्नायाज्जुम्बुकायेति वा पुनः ।
पुण्यानि च स्मरेत् तीर्थान्युशना मुनिरब्रवीत् ।।

स्मृतिचन्द्रिका २.२६२

३. क—सं ।
४. क—अक्नेय ।
५. क—वरुण ।
६. क—ब्राह्म्या ।
७. क—बयब्य ।
८. क में नहीं है ।

१७

[illegible]

[illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]आग्नेयं[2] भस्मना स्नानं जले गाहनं तु वारुणम्[3] ।
ब्राह्म्यं[4] वै मन्त्रतः स्नानं वायव्यं[5] तु गवां रजः[7] ॥१७॥

आग्नेय ङ स्नान मकलक्षणं भस्म ॥ कुनं इकं वारुण[6] । मसिलिम व्वै[7] लक्षणन्य ॥ ब्राह्म्य ङ स्नान मकलक्षणं मन्त्र ॥ कुनं इकं वायव्य[8] ङ स्नान मकलक्षणं सुमिल्मकॅन्[9] । शरीर त्कें उत्तमाङ्ग । मकनिमित्त व्लॅक्नि ल्बु । सकें[10] [11]सुकु निं[11] लृम्बु[12] । अन् गिनृकि ल्मः पवित्र ॥

आग्नेय का लक्षण भस्म से स्नान करना । वारुण का लक्षण है पानी में डुबकी लगाना । ब्राह्म्य का लक्षण है मन्त्र-स्नान । वायव्य का लक्षण है गाय के पैर द्वारा पवित्र भूमि से उठे रज से उत्तमाङ्ग पर्यन्त शरीर को स्नान कराना ॥

१-१. क—
आक्नेयं भष्मनस्ननं । जलेगाह्वन्तु वारुणं ।
ब्राह्म्या वे मन्त्रतः स्नानं । वायव्यान्तु गवम्प्रति ॥
ग—अघ्नेयम्भस्मनस्ननं । सलिलाघ्नेन वरुणं ।
ब्राह्मावेमनन्त्रन शुचं । वायव्यन्तु गवंराजस् ॥

२. आग्नेय स्नान—
आग्नेयं भस्मना स्नानं ।

भस्मना—संस्कृताग्निभस्मना । व्रतिनां चैव तत् स्नानमिति विशेषयन्ति—टीका-छन्दोगाह्निक पृ.१०

योगियाज्ञवल्क्य (वीरमित्रोदय २.१९५, स्मृतिचन्द्रिका २.३४८)

आग्नेयं भस्मना स्नानं ।

हारीत (कृत्यकल्पतरु ३.५१)

अग्निरिति भस्मेत्यादि मन्त्रैरङ्गेषु भस्मलेपनमाग्नेयस्नानम् ॥

ऋग्वेदीय ब्रह्मकर्मसमुच्चय ५.३

अत्र अग्निमीले इत्याद्यन्यतमाग्निप्रकाशकमन्त्रेण त्र्यायुषमिति मन्त्रेण वा भस्मनाङ्गोद्धूलनरूपमाग्नेयम् ।

वीरमित्रोदय २.१ : ३

आग्नेयं भस्मनापदमस्तकाद् देहधूलनम् ।

कूर्मपुराण (स्मृतिचन्द्रिका २.३४९)

पुण्यं कनखले यच्च प्रयागे यच्च सुन्दरि ।
तत् फलं सकलं देवि भूतिस्नाने विधीयते ॥

ब्रह्मपुराण (वीरमित्रोदय २.१९५)

प्रथमं भस्मस्नानम् । ॐ अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म, सर्वं ह वा इदं भस्म, मन एतानि चक्षूंषि भस्मानि ॥ ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः । बाहुभ्यामुत ते नमः ॥
यथाग्निर्दहते भस्म तृणकाष्ठादिसञ्चयम् ।
तथा मे दह्यतां पापं कुरु भस्म शुचे शुचिम् ॥

नित्यनैमित्तिककर्मसमुच्चय पृ.३४

अगस्त्यपर्व पृ.६८ पर भस्मस्नान शब्द आया है ।

ऋग्वेदीय नित्यविधि २ में भस्मधारण-विधि का मन्त्रों सहित निरूपण है ।

३. वारुण स्नान—
वारुणं चावगाहम् ।

योगियाज्ञवल्क्य (वीरमित्रोदय २.१९५, स्मृतिचन्द्रिका २.३४९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्भिर्वारुणमुच्यते ।

तेन जलं प्रविश्य उद्धृतजलैर्वा स्नानं वारुणमेव । स्नानानुकल्पषट्कमध्ये मुख्यं वारुणस्नानकीर्तनं तत्तुल्यत्वज्ञापनार्थम् ।

हारीत (कृत्यकल्पतरु ३.५१)

अगस्त्यपर्व में तोयस्नान शब्द आया है ।

प्रपद्य वरुणं देवमम्भसां पतिमर्चितम् ।
याचेत देहि मे तीर्थं सर्वपापापनुत्तये ॥

शङ्ख ८.३ (धर्मशास्त्र १.३५१)

४. ब्राह्म्य स्नान—

आचम्य यथानिमित्तं संकल्पादि कृत्वा आपोहिष्ठादिमन्त्रैः प्रोक्षणं मन्त्रस्नानम् ॥

ऋग्वेदीय ब्रह्मकर्मसमुच्चय ५.१

आपो हि ष्ठेति च ब्राह्मम् ।
आपो हि ष्ठेति मन्त्रचतुष्टयोपलक्षणम् ।

हारीत (कृत्यकल्पतरु ३.५१)

शन्न इत्यादिमन्त्रचतुष्टयेन आपोहिष्ठेत्यादिऋक्त्रयेण वा मार्जनरूपं ब्राह्मम् ।

वीरमित्रोदय २.१९३

इदं मान्त्रं वरं स्नानं सहस्रादधिकं स्मृतम् ।
कृत्वादौ वैदिकं स्नानं ततस्तान्त्रिकमाचरेत् ॥
विन्यस्याङ्गे षडङ्गानि प्राणायामपुरःसरम् ।
श्रीसूर्यमण्डलात्तीर्थमाकृष्याङ्कुशमुद्रया ॥
वमित्यनेन चाप्लाव्य कवचेनावगुण्ठयेत् ।
संरक्ष्यास्त्रेण मूलेन मन्त्रयेद्रुद्रसंख्यया ॥

रामार्चनचन्द्रिका पृ.४२

गर्ग (वीरमित्रोदय २.१९६) ने भी षड्विध स्नान में से एक ब्रह्मस्नान रखा है । व्रतिशासन में ब्राह्म्यस्नान का लक्षण मन्त्र बताया है । योगियाज्ञवल्क्य ने मान्त्र की व्याख्या 'आपो हि ष्ठेति वै मान्त्रं...' की है ।

५. वायव्य स्नान—

वायव्यं गोरजः स्मृतम् ।

योगियाज्ञवल्क्य (वीरमित्रोदय २.१९५, स्मृतिचन्द्रिका २.३४८)

वायव्यं गोरजः प्रोक्तमस्तं गच्छति गोपतौ ।

बृहस्पति (वीरमित्रोदय २.१९६)

पञ्चमं गोरजस्नानम्—ॐ आयङ्गौः पृश्निरक्रमीदसदन्नमातरं पुरः । पितरं च प्रयन्त्स्वः ॥
गवां खुरेण निर्धूतं यद्रेणु गगने गतम् ।
शिरसा तेन संल्लेपो महापातकनाशनम् ॥

नित्यनैमित्तिककर्मसमुच्चय पृ ३५

वायव्यं गोरजः स्मृतम् ।

हारीत (कृत्यकल्पतरु ३.५१)

अश्वक्रान्तेत्यादिमृद्ग्रहणमन्त्रेण गोखुरोद्धृतरजसानावृतदेहसंबन्धो वायव्यम् ।

वीरमित्रोदय २.१९३

६. क—बरुण, घ—वरुण ।
७. क—वे ।
८. क—वयव्य ।
९. क—सुमिलृमकँन् ।
१०: क—सङ्के ।
११-११. घ—सुनिं ।
१२. घ—ल्बु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८

[illegible]

[illegible]

[illegible]

[1]जप्यं तु मनसः[2] स्नानं त्रिसन्ध्योपासनं[3] भवेत् ।
पूर्णतीर्थमृदां स्पर्शः पार्थिवं[4] स्नानमुच्यते[1] ॥१८॥

कुनं इकं मानस[5] स्नान । मकलक्षणं जप मन्त्र । रि स्डॅङि मास त्रिसन्ध्योपासन[6] ॥ कुनं इकं पृथ्वीस्नान[7] । मकनिमित्त कहरसनि ल्मः नि पुण्यतीर्थ ॥ नहन् त ल्विनि षट्स्नान[8] । उपलक्षणाक्न[9] दे[10] सं विकु ॥

पुनश्च मनसा स्नान का लक्षण है त्रिसन्ध्योपासन के समय पृथ्वीस्नान अर्थात् पुण्य तीर्थों की मिट्टी का स्पर्श । इस प्रकार ये षट्स्नान के छः प्रकार हैं जिनका श्री व्रती पालन करे ॥

१-१. क—
जप्वन्तु मनसः स्नानं । त्रिसन्ध्योपस्ननम्भवेत् ।
पूण्यतिर्थमृदं स्पर्षं । पर्थिवास्ननमुच्यते ॥
ग—जप्यन्तु मनसा स्नानं । त्रिसन्ध्योपसनं भवेत् ।
पुण्यर्तिर्थ्थमृदं स्पर्सः । पार्थ्थिवं स्ननमुच्यते ॥

२. मानस स्नान—
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते ।
वारुणं चावगाहात्तु मानसं विष्णुचिन्तनम् ॥
शस्तं स्नानं यथोद्दिष्टं मन्त्रस्नानक्रमेण तु ।
कालाद्देशादसामर्थ्यात् सर्वं तुल्यफलं स्मृतम् ॥
मानसं प्रवरं स्नानं केचिदिच्छन्ति सूरयः ।
आत्मतीर्थप्रशंसायां व्यासेन पठितं यतः ॥

योगियाज्ञवल्क्य (कृत्यकल्पतरु ३.५३)

इत्युक्तं मानसस्नानं सर्वस्नानाधिकं परमिति मानसस्नानं कुर्यात् ।

वैष्णवाह्निक पृ.२६

मनसा मूलमन्त्रेण प्राणायामपुरःसरम् ।
कुर्वीत मानसं स्नानं सर्वत्र विहितं च तत् ॥
दिव्यचन्दनलिप्ताङ्गं चारुहासं शुभेक्षणम् ।
नारदाद्यैः सेव्यमानं भास्वद्विपुलकङ्कणम् ॥

रामार्चनचन्द्रिका ४२

३. व्रतिशासन के अनुसार मानस स्नान के अन्तर्गत जप, त्रिसन्ध्या कही गई है । कृत्यकल्पतरु ३.८८..., स्मृतिचन्द्रिका २.४९८, वीरमित्रोदय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

में जपविधि पर पूरा प्रकरण है। त्रिसंध्योपासन प्रशंसा के लिए कुछ स्थल दर्शनीय हैं—

यावन्तोऽस्यां पृथिव्यां तु विकर्मस्था द्विजातयः।
तेषां हि पावनार्थाय संध्या सृष्टा स्वयम्भुवा ॥
योगियाज्ञवल्क्य (वीरमित्रोदय २.२५६)

संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु।
यदन्यत् कुरुते कर्म न तस्य फलभाग्भवेत् ॥
दक्ष (वीरमित्रोदय ३.५८)

एतत् संध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्।
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते ॥
छन्दोगपरिशिष्टे कात्यायनः (वीरमित्रोदय २.२५९)

त्रिविधो जपयज्ञः स्यात्तस्य भेदं निबोधत।
वाचिकश्च उपांशुश्च मानसश्च त्रिधा मतः ॥
त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः।
यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः ॥
मन्त्रमुच्चारयेद् व्यक्तं जपयज्ञः स वाचिकः।
शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ च चालयेत् ॥
किञ्चिच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः।
धिया यदक्षरश्रेण्यो वर्णाद्वर्णं पदात् पदम् ॥
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः। किञ्चिच्छब्दं स्वयं विद्याद्यथा तं ध्वनिमन्यो न जानातीत्यर्थः।
नृसिंहपुराण (वीरमित्रोदय २.३१६...)

ऋग्वेदीय ब्रह्मकर्मसमुच्चय पृ.५ में विष्णुध्यान, जप, संध्या आदि गौण स्नान के अन्त में बताए हैं—...विष्णुपादोदकविप्रपादोदकोक्षणविष्णुध्यानादिभिश्च सन्ति स्नानान्तराणि ॥ ५ ॥ गौणस्नानैर्जपसंध्यादौ शुद्धिर्न तु श्राद्धदेवार्चनादौ ॥ ब्रह्मयज्ञे विकल्पः ॥

४. पार्थिव स्नान—

...तत्राप्यशक्तौ तत्तच्छास्त्रचोदितेषु पार्थिवाग्नेयमान्त्रमानसपञ्चाङ्गपुरुषान्तरकृतस्पृष्टिपूर्वाङ्गावगाहनरूपेषु स्नानान्तरेषु अन्यतमं स्नानं कुर्यात्। गौणस्नानेषु देवर्षिपितृतर्पणं न कुर्यात्।
वैष्णवाह्निक पृ.२६

व्रतिशासन १८ के अनुसार पुण्यतीर्थमृदास्नान ही पार्थिव स्नान है। इसकी मृत्तिका-स्नान से तुलना कर सकते हैं—मृत्तिकास्नानम्। मृत्तिकां स्वदक्षिणहस्ते गृह्णीयात् ॥

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।
उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥
मृत्तिके ब्रह्मपूतासि काश्यपेनाभिवन्दिता।
त्वया हतेन पापेन गच्छामि परमां गतिम् ॥
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्। ...

इति मन्त्रेण स्वशरीरं मृत्तिकया पूर्वोक्तप्रकारेणानुलिप्य तीर्थे स्नायात्। तत्र मन्त्रः।...। एतावत् पर्यन्तं मन्त्रं पठित्वोन्मज्ज्य पुनः।...। (अनेनार्घमन्त्रेण द्वितीयवारं स्नायात्) पुनस्तूष्णीं निमज्ज्योन्मज्ज्याचमनं कुर्यात् ॥ इति मृत्तिकास्नानम् ॥
नित्यनैमित्तिककर्मसमुच्चय पृ.१९

५. क—मनसा।
६. क—°न, घ—°पस्नान।
७. क—पर्थिवा°।
८. क—षद्स्नन।
९. क—उपलक्षणक्न।
१०. क में नहीं है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९

[illegible]

[illegible]

[illegible]

[1]विद्यास्नातः[2] परः स्नातः स्नातश्च नियमैर्व्रतैः ।
नैव स्नातः प्रवर्तेत न स्नातो यदि भस्मना[1] ॥ १९ ॥

क । हन त सिर वनेः तन् पस्नान ॥ न्दन् सं ह्यं विद्या जुग पिनकस्नान निर । [3]मकनिमित्त कपवित्र्निं[3] हजि कतम दे निर । त्लस् प्रतिष्ठें[4] हृदयकमल ॥ मुवः सवनेः । हन सिर मकस्नान नियमव्रत । इक त सं विकु तन् पस्नान ॥

न्दन् इकं भस्म जुग विशेष निं स्नान कबेः ॥

दूसरे ऐसे भी लोग हैं जो [शारीरिक] स्नान नहीं करते । दिव्य विद्यार्जन ही उनका स्नान-स्वरूप है । जो पवित्र ज्ञान वे प्राप्त करते हैं वह उनके हृदयकमल में प्रतिष्ठित होता है । और कुछ ऐसे हैं जिनका स्नान नियमव्रत है । ये [शारीरिक] स्नान न करने वाले व्रती हैं ।

सब स्नानों में भस्मस्नान निश्चितरूपेण विशिष्ट है ।

१-१. क—
विद्यस्नतःपरोस्नतः । स्नातश्चनियमेव्रतेः ।
वेष्णतोवप्रवत्त्योत्तः । नस्नतोयदिभष्मन ॥

ग—
विद्यास्ननःपरोस्नतः । स्नानश्चनियमव्रतः ।
नेवस्नतःप्रवत्तेत्त । स्ननेनयदिभास्मन ॥

२. सारस्वतस्नान विद्यास्नान के समीपतम गिना जा सकता है—
दिव्यं वायव्यमाग्नेयं ब्राह्मं सारस्वतं तथा ।
मानसं चेति विज्ञेयं गौणस्नानं तु षड्विधम् ॥
सरस्वती विदुषां वाक् तया प्राप्तं सारस्वतम् ।
गर्ग (वीरमित्रोदय २.१९६)

वायव्यं गोरजः प्रोक्तमस्तं गच्छति गोपतौ ।
विद्वत्सरस्वतीप्राप्तं स्नानं सारस्वतं तु तत् ॥
बृहस्पति (वीरमित्रोदय २.१९६, गोपतौ सूर्ये)

सारस्वतस्वरूपमाह—
स्वयमेवोपसन्नाय विनयेन द्विजातये ।
तज्ज्ञः संपादयेत् स्नानं शिष्याय च सुताय च ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दाक्षायणमयैः कुम्भैर्मन्त्रवज्जाह्नवीजलैः ।
कृतमङ्गलपुण्याहैः स्नानमस्तु तवानघ ॥
इत्युक्त्वा जाह्नवीस्नाने तीर्थान्यन्यानि कीर्तयेत् ।
सर्वतीर्थाभिषेकस्तु भूयादित्यन्ततो वदेत् ॥
इत्येवं मन्त्रिवर्याणां वचनेन महात्मनाम् ।
सर्वतीर्थेषु सुस्नातः पूतो भवति नान्यथा ॥
व्यास (वीरमित्रोदय २.१९७)

व्रतिशासन के अनुसार सबसे श्रेष्ठ स्नान भस्मस्नान है। भस्मस्नान की महिमा हमारे यहां भी है। भस्मस्नान के समान स्थलों के लिए श्लोक १७ देखिए।

३-३. घ—मकपवित्रनिं ।

४. क—पिन्नतिष्टें ।

२०

[illegible]

[illegible]

[illegible]

[1]केशकीटोपसंसृष्टमज्ञानेन यद्भुक्तं च ।
भस्मकीर्णं वाचाशास्तं भोज्यमनिन्द्यं मुनीनाम्[1] ॥२०॥[2]

क। इकं पिनङन्। यन् कवोरन् कीट[3] म्वं केश ॥ कीट[3] ङ कद्यङ्ग नि[4] स्मुत्, उलूर्, ललूर्[5], ऋङ्ति इत्येवमादि कं प्राणी सूक्ष्म तन्शुचि ॥ केश ङ इकं[5] रम्बुत्। इक तन्[6] किनब्रुहन् पवोर्न्यें[7] सर्वभुक्ति[8]। मकनिमित्त सूक्ष्मन्य। तन् दोष सं विकु।[9] अन् पमङन् कवोरन् देन्य। य[10] तन् [11]सिर विहिकॅन्[11]। मकनिमित्त कपवित्रनिं भस्म[12] कहरस् इनङ्गे सं विकु। म्वं रि दे निरान् पग्लर्[13] प्राणायाम प्रतिदिन ॥ निहन् शास्त्रन्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीट और केश से समन्वित भोजन। कीट जैसे चींटी, कीड़ा, मक्खी, पतंगा इत्यादि जो अपवित्र छोटे प्राणी हैं। केश अर्थात् बाल। ये समस्त भोजन में सूक्ष्म होने के कारण पड़े हुए पता नहीं लगते। यदि इनसे समन्वित भोजन खा ले तो श्री व्रती को कोई दोष नहीं लगता, क्योंकि वह नहीं जानता। श्री व्रती के पवित्र भस्म के लेप के कारण और प्रतिदिन प्राणायाम के अभ्यास के हेतु [उसे कोई दोष नहीं लगता।] शास्त्रों में इस प्रकार [लिखा] है।

१-१. क—

केशकितोपसंस्नषि । अप्रसन्तनियनिच ।
भष्मण(ख-ना)न्तनिपृष्टनि। भोज्यानिन्दिमनिनिन ॥

ग—

क्रिमिस्केटबरोमानि । मिश्रनि । भोजनानि । च ।
सूक्ष्मदृश्येन। भष्मेन। शोच्युः प्रभक्ष्यताः। बुदाः ॥

२.

मत्तक्रुद्धातुराणां च न भुञ्जीत कदाचन ।
केशकीटावपन्नं च पदा स्पृष्टं च कामतः ॥
भ्रूणघ्नावेक्षितं चैव संस्पृष्टं चाप्युदक्यया ।
पतत्रिणावलीढं च शुना संस्पृष्टमेव च ॥
गवा चान्नमुपाघ्रातं घुष्टान्नं च विशेषतः ।
गणान्नं गणिकान्नं च विदुषा च जुगुप्सितम् ॥

मनु ४.२०७-९

इस श्लोक की कवि टीका के अनुसार यदि व्रती कीट, केश इत्यादि से युक्त भोजन को अज्ञानवश खा ले तो उसकी भस्मलेप एवं प्रतिदिन प्राणायाम विधि करने से पवित्रता हो जाएगी। स्मृतिग्रन्थों में उच्छिष्ट तथा अभक्ष्य पदार्थ खाने के पश्चात् अनेक प्रायश्चित्त विधान दिए गए हैं, यथा—

अभोज्यानां तु भुक्त्वान्नं स्त्रीशूद्रोच्छिष्टमेव च ।
जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान् पिबेत् ॥
विड्वराहखरोष्ट्राणां गोमयः कपिकाकयोः ।
प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत् ॥
क्रव्यादसूकरोष्ट्राणां कुक्कुटानां च भक्षणे ।
नरकाकखराणां तप्तकृच्छ्रं विशोधनम् ॥
विडालकाकाखूच्छिष्टं जग्ध्वा श्वानकुलस्य च ।
केशकीटावपन्नं च पिबेद्ब्रह्मसुवर्चलाम् ॥
अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता ।
अज्ञानभुक्तं तूत्तार्यं शोध्यं वाप्याशु शोधनैः ॥

मनु ११.१५२, १५४, १५६, १५९, १६०

केशकीटनखस्नाय्वस्थिकण्टकमेव च ।
स्पृष्ट्वा नद्युदके स्नात्वा घृतं प्राश्य विशुध्यति ॥

अत्रिसंहिता १८६ (धर्मशास्त्र १.१९७)

केशकीटावपन्नं च नीलीलाक्षोपघातितम् ।
स्वाय्वस्थिचर्मसंस्पृष्टं भुक्त्वा तूपवसेदहः ॥

संवर्त (याज्ञवल्क्य पृ. ४५५ की मिताक्षरा टीका से उद्धृत)

केशकीटावपन्नं च रुधिरमांसास्पृश्यस्पृष्टभ्रूणघ्नावेक्षितपतत्र्यलीढश्वसूकरगवाघ्रातशुक्तपर्युषितवृथापक्वदेवान्नहविषां भोजने उपवासः पञ्चगव्याशनं च ॥

शातातप (तदेव)

अनर्चितं वृथामांसं केशकीटसमन्वितम् ।
शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम् ॥
उदक्यास्पृष्टसंघुष्टं पर्यायान्नं च वर्जयेत् ।
गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः ॥

याज्ञवल्क्य १.१६७, १६८

काककुक्कुरसंस्पृष्टं भुक्तं वा क्रिमिसंयुतम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभोज्यं तद्विजानीयाद्धर्मराजवचो यथा ॥

यम (वीरमित्रोदय २.५१८)

केशकीटनखरोमाखुपुरीषाणि दृष्टानि तावन्मात्रमन्नमुद्धृत्य शेषं भोज्यमिति ।

बौधायन (वीरमित्रोदय २.५१९)

कामं केशकीटानुद्धृत्याद्भिः प्रोक्ष्य भस्मनावकीर्य वाचा प्रशस्तमन्नं भुञ्जीतेति ।

अमेध्यैः कलञ्जपलाण्ड्वादिभिरवमृष्टं संसृष्टमभोज्यम् । अमेध्यसेवी कृमिः कीटो यस्मिन्नन्ने, तदप्यभोज्यमिति शेषः । मूषकला मूषिकविष्ठा, अङ्गं मूषिकपुच्छं पादादि वा यस्मिन्नन्ने तदप्यभोज्यम् । पदा पादेन बुद्धिपूर्वं स्पृष्टम् । सिचा परिहितवस्त्रप्रान्तेन प्रक्षालितेनापि स्पृष्टम् । शुना कुक्कुरेण अपपात्रेण पतितसूतिकादिना स्पृष्टं दृष्टं च ।...

वसिष्ठ (वीरमित्रोदय २.५१९)

अभोज्यं प्राहुराहारं शुक्तं पर्युषितं सदा ।
अन्यत्र मधुसक्तुभ्यां भक्ष्येभ्यः सर्पिषो गुडात् ॥
अवलीढं च मार्जारध्वांक्षकुक्कुटवायसैः ।
भोजने नोपभुञ्जीत तदमेध्यं हि धर्मतः ॥
विशुद्धमपि चाहारं दूषितं कृमिजन्तुभिः ।
केशलोमनखैर्वापि दूषितं परिवर्जयेत् ॥

देवल (वीरमित्रोदय २.५२०)

मक्षिकाकेशमन्नेषु पतितं यदि दृश्यते ।
मूषकस्य पुरीषं वा क्षुतं यच्चावधूनितम् ॥
भस्मनास्पृश्य चाश्नीयादभ्युक्ष्य सलिलेन वा ।
अवक्षुतं केशपतङ्गकीटैरुदक्यया वा पतितैश्च दृष्टम् ।
अलातभस्माम्बुहिरण्यतोयैः संस्पृष्टमन्नं मनुराह भोज्यम् ॥

मक्षिका दंशमशका घुणाः सूक्ष्माः पिपीलिकाः ।
एतैः स्पृष्टं न दुष्टं स्यान्नैते कीटा विपत्तये ॥

यम (कृत्यकल्पतरु १०.१६३)

गोघ्रातेऽन्ने तथा केशमक्षिकाकीटदूषिते ।
मृद्भस्म सलिलं वापि प्रक्षेप्तव्यं विशुद्धये ॥

याज्ञवल्क्य १.१८९

त्वक्केशनखकीटाखुपुरीषाणि दृष्ट्वा तं देशं पिण्डमुद्धृत्याद्भिरभ्युक्ष्य भस्मावकीर्य पुनरद्भिः प्रोक्ष्य वाचा च प्रशस्तमुपभुञ्जीत ॥

बौधायन२.१२.६ (कृत्यकल्पतरु १०.१६४)

पक्वमन्नं केशकीटोपहतं च । कामं तु केशकीटानुद्धृत्याद्भिः प्रोक्ष्य भस्मनावकीर्य वाचा प्रशस्तमुपभुञ्जीत ॥

वसिष्ठ २.१४.२२-२४ (कृत्यकल्पतरु १०.१६४)

केशकीटगवाघ्रातमन्नं हिरण्येन च भस्मना वा स्पृष्टं प्रोक्षितं भोज्यम् ॥

पैठीनसि (कृत्यकल्पतरु १०.१६४)

केशकीटगवाघ्रातं वायसोपहतं तथा ।
क्लीबाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः ॥
दृष्टं वा स्याद्यदन्नं तु तस्य निष्कृतिरुच्यते ।
अभ्युक्ष्य किंचिदुद्धृत्य तद्भुञ्जीत विशेषतः ॥
भस्मना वापि संस्पृश्य संस्पृशेदुदकेन वा ।
सुवर्णरजताभ्यां वा भोज्यं घ्रातमजेन वा ॥...

शातातप (कृत्यकल्पतरु १०.१६५)

केशकीटक्षुतनिष्ठीवनोपहतं श्वभिर्वाघ्रातं प्रोक्षितमात्रम् । दधिपर्युपासितं पुनः सिद्धम् । चण्डालावेक्षितमभोज्यम् ।...

सुमन्तु (कृत्यकल्पतरु १०.१६६)

[श्वकाकगृध्रोपघाते] केशकीटपिपीलिका-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिभिरन्नाद्युपघाते काञ्चनरजतवैडूर्यप्रवालादिभिरेकतमेन वाद्भिः संस्पृष्टेन मन्त्रप्रोक्षणपर्यग्निकरणादित्यदर्शनात् पूतो भवति ।...

हारीत (कृत्यकल्पतरु १०.१६७)

३. क—किथ, ख—किट ।
४. क—निं ।
५: क में नहीं है ।
६. क—ततन् ।
७. क—पमोर्न्यं निं, ख—पमोर्न्यं रिं ।
८. क— °भिनुक्ति ।
९. क में नहीं है ।
१०. क—यन् ।
११-११. घ—सरविहिकन् ।
१२. क—°ष्म ।
१३. क—पंग्लर् ।

२१

[illegible]

[1]प्राणायामैर्दहेद् दोषान् धारणाभिश्च किल्बिषम् ।
विषयान् प्रत्याहारेण ध्यानेनानीश्वरान् गुणान्[1] ।।२१।।[2]

अपनिकं प्राणायाम[3] अंग्सॅङि दोष । इकं क्लेश ग्सॅं देनिं धारण[4] । इकं विषय ग्सॅं देनिं प्रत्याहार[5] । इकं ध्यान[6] मऽहिलङकॅन् गुण तन्विशेष । निहन् कन्नुहन दे सं विकु । लिं निं शास्त्र ।।

क्योंकि प्राणायाम से दोष जल जाते हैं, धारण से क्लेश, और प्रत्याहार से विषय । ध्यान से अविशेष गुण नाश हो जाते हैं । श्री व्रती को यह जानना चाहिए । शास्त्र का वचन है ।

१-१. क—
प्रणयमदहेदोषान् । धारणे (ख-णे:) दग्धकिल्विषं ।
विषयोप्रत्यहारेण । ध्यानेनविश्वषेत्गुणम् ।।
ग—
प्रणयमैः । दोषं दग्ध्वा । धारणानिश्चकिल्विषं ।
प्रत्यहारेण विषयन् । ध्यानेन निश्वरन् गुणन् ।।
२. समान स्थल—
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्विषम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥

एवं सति अनन्तरोक्तप्रकारेण प्राणायामै रागादिदोषान् दहेत् । अपेक्षितदेशे परब्रह्मादौ यन्मनसो धारणं सा धारणा, तया पापं नाशयेत् । प्रत्याहारेण विषयेभ्य इन्द्रियाकर्षणैर्विषयसंपर्कान् वारयेत् । ब्रह्मध्यानेनेति । सोऽहमस्मीति सजातीयप्रत्ययप्रवाहरूपेणानीश्वरान् गुणान् ईश्वरस्य परमात्मनो ये गुणा न भवन्ति क्रोधलोभासूयादयः तान्निवारयेत् ।

मनु ६.७२

प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् ।
प्रत्याहारैरसत्सङ्गान् ध्यानेनानीश्वरान् गुणान् ॥

शङ्ख ७.१२ (धर्मशास्त्र १.३४९)

प्राणायामैर्दग्धदोषः शुक्लाम्बरधरः शुचिः ।
यथाविध्यप आचम्य आहरेद्दर्भसंस्तरम् ॥

शौनक (स्मृतिचन्द्रिका २.५०५)

योगाभ्यासबलेनैव नश्येयुः पातकानि तु ।
तस्माद्योगपरो भूत्वा ध्यायेन्नित्यं क्रियापरः ॥
प्राणायामेन वचनं प्रत्याहारेण चेन्द्रियम् ।
धारणाभिर्वशे कृत्वा पूर्वं दुर्धर्षणं मनः ॥

हारीत ७.३, ४ (धर्मशास्त्र १.१०७)

कवि भाषा के ग्रन्थ गणपतितत्त्व ४४ में प्राणायाम, धारण और समाधि को ध्यानादित्रय कहा है—मुवः ध्यानादित्रय ङ अप्राणायाम । अधारण । असमाधि । अप्राणायाम कुञ्जी रहस्य ङ अनुङ्गलकॅन्निश्वास ॥ धारण ङ प्रणवज्ञानैकता । प्रणवज्ञानैकता ङ पनुङ्गलनिं चित्त । समाधि ङ निर्व्यापारज्ञान ।...

३. प्राणायाम के विस्तृत विवेचन के लिए गणपतितत्त्व ४३-४८ के टिप्पणों में संस्कृत स्थल दर्शनीय हैं । वहां षडङ्गयोग (प्रत्याहार, ध्यान, प्राणायाम, धारण, तर्क, समाधि) के अन्तर्गत प्राणायाम आया है । व्रतिशासन में व्रती को इसका पूर्ण ज्ञान होना चाहिए क्योंकि इससे समस्त दोष जल जाते हैं—

प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत् कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥
दह्यन्ते ध्यायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥

मनु ६.७०, ७१

किंचिदेव तु विप्राय दद्यादस्थिमतां वधे ।
अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति ॥

अस्थिमतां क्षुद्रजन्तूनां कृकलासादीनां प्रत्येकं वधे किंचिदेव दद्यात् । अस्थिमतां वधे पणो देयः सुवर्णस्य इति सुमन्तुस्मरणात् किंचिदेवेति पणो बोद्धव्यः । अनस्थिमतां तु यूकामत्कुणादीनां प्रत्येकं वधे प्राणायामेन शुद्धो भवति । प्राणायामश्च सव्याहृतिकां सप्रणवां सावित्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायाम स उच्यते ॥ इति वसिष्ठप्रोक्तलक्षणो ग्राह्यः ॥

मनु ११.१४१

मानसं वाचिकं पापं कायेनैव तु यत्कृतम् ।
तत् सर्वं नश्यति क्षिप्रं प्राणायामत्रये कृते ॥

संवर्त (स्मृतिचन्द्रिका २.३७४)

पूरकः कुम्भको रेच्यः प्राणायामस्त्रिलक्षणः ।

योगियाज्ञवल्क्य (स्मृतिचन्द्रिका २.३७२)

नाभिपद्मस्थितं ध्यायेत् कं रक्तं पूरणेन तु ।
नीलोत्पलाभं हृत्पद्मे कुम्भकेन जनार्दनम् ॥
ललाटस्थं शिवं श्वेतं रेचकेनापि चिन्तयेत् ।
शुद्धस्फटिकसंकाशं निर्मलं पापनाशनम् ॥

व्यास (स्मृतिचन्द्रिका २.३७२)

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायाम स उच्यते ॥

शङ्ख ७.१३ (धर्मशास्त्र १.३४९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. मनसः संयमस्तज्ज्ञैर्धारणेति निगद्यते ।
शङ्ख ७.१४ (धर्मशास्त्र १.३४९)

सूतसंहिता २३५.७-१३ में धारणाविधि-निरूपण दर्शनीय है—

अथवा तव वक्ष्यामि धारणां मुनिपुङ्गव ।
मनसीन्दुं दिशः क्षेत्रे क्रान्ते विष्णुं बले हरिम् ॥
वाच्याग्निं मित्रमुत्सर्गे तथोपस्थे प्रजापतिम् ।
त्वचि वायुं तथा नेत्रे सूर्यमूर्तिं तथैव च ॥
जिह्वायां वरुणं घ्राणे भूमिदेवीं तथैव च ।
पुरुषे सर्वशास्तारं बोधानन्दमयं शिवम् ॥
धारयेद् बुद्धिमान् नित्यं सर्वपापविशुद्धये ।
एषा च धारणा प्रोक्ता योगशास्त्रार्थवेदिभिः ॥
ब्रह्मादिकार्यरूपाणि स्वे स्वे संहृत्य कारणे ।
सर्वकारणमव्यक्तमनिरूप्यमचेतनम् ॥
साक्षादात्मनि संपूर्णे धारयेत् प्रयतो नरः ।
धारणैषा परा प्रोक्ता धार्मिकैर्वेदपारगैः ॥
इन्द्रियाणि समाहृत्य मनसात्मनि धारयेत् ।
कंचित् कालं महाप्राज्ञ धारणैषा च पूजिता ॥

५. क—प्रत्यहार ।

सूतसंहिता पृ.२३० में प्रत्याहारविधिनिरूपण शीर्षक के अन्तर्गत प्रत्याहार की महत्त्वपूर्ण विवेचना दर्शनीय है—

अथातः संप्रवक्ष्यामि प्रत्याहारं महामुने ।
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ॥
बलादाहरणं तेषां प्रत्याहारः स उच्यते ।
यद्यत् पश्यति तत् सर्वं ब्रह्म पश्येत् समाहितः ॥
प्रत्याहारो भवत्येष ब्रह्मविद्भिः पुरोदितः ।
यद्यच्छुद्धमशुद्धं वा करोत्यामरणान्तिकम् ॥
तत् सर्वं ब्रह्मणे कुर्यात् प्रत्याहारोऽयमुच्यते ।
अथवा नित्यकर्माणि ब्रह्माराधनबुद्धितः ॥
काम्यानि च तथा कुर्यात् प्रत्याहारः स उच्यते ।
अथवा वायुमाकृष्य स्थानात् स्थाने निरोधयेत् ॥
दन्तमूलात्तथा कण्ठे कण्ठादुरसि मारुतम् ।
उरोदेशात् समाकृष्य नाभिकन्दे निरोधयेत् ॥
नाभिकन्दात् समाकृष्य कुण्डल्यां तु निरोधयेत् ।
कुण्डलीदेशतो विद्वान् मूलाधारे निरोधयेत् ॥
तथापाने कटिद्वन्द्वे तथोरुद्वयमध्यमे ।
तथा जानुद्वये जङ्घे पादांगुष्ठे निरोधयेत् ॥
प्रत्याहारोऽयमित्युक्तः प्रत्याहारपरैः पुरा ।
एवमभ्यासयुक्तस्य पुरुषस्य महात्मनः ॥
सर्वपापानि नश्यन्ति भवरोगाश्च सुव्रत ।
अथवा तव वक्ष्यामि प्रत्याहारान्तरं मुने ॥
नाडीभ्यां वायुमाकृष्य निश्चलः स्वस्तिकासनः ।
पूरयेदनिलं विद्वानापादतलमस्तकम् ॥
पश्चात् पादद्वये तद्वन्मूलाधारे तथैव च ।
नाभिकन्दे च हृन्मध्ये कण्ठमूले च तालुके ॥
भ्रुवोर्मध्ये ललाटे च तथा मूर्धनि धारयेत् ।
अकारं च तथोकारं मकारं च तथैव च ॥
नकारं च मकारं च शिकारं च वकारकम् ।
यकारं च तथोङ्कारं जपेद्बुद्धिमतां वर ॥
प्रत्याहारोऽयमित्युक्तः पण्डितैः पण्डितोत्तम ।
अथवा मुनिशार्दूल प्रत्याहारं वदामि ते ॥
देहाद्यात्ममतिं विद्वान् समाकृष्य समाहितः ।
आत्मनात्मनि निर्द्वन्द्वे निर्विकल्पे निरोधयेत् ॥
प्रत्याहारः समाख्यातः साक्षाद्वेदान्तवेदिभिः ।
एवमभ्यसतस्तस्य न किंचिदपि दुर्लभम् ॥
तस्य पुण्यं च पापं च नहि सत्यं बृहस्पते ।
अयं ब्रह्मविदां श्रेष्ठः साक्षाद्देवेश्वरः पुमान् ॥
प्रत्याहारः समाख्यातः संक्षेपेण महामुने ।
गोपनीयस्त्वया नित्यं गुह्याद्गुह्यतरो ह्ययम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संहारश्चेन्द्रियाणां च प्रत्याहारः प्रकीर्तितः ।
शङ्ख ७.१४ (धर्मशास्त्र १.३४९)

६. उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ।
ध्यानयोगेन संपश्येद्गतिमस्यान्तरात्मनः ॥
मनु ६.७३

हृदयस्थस्य योगेन देवदेवस्य दर्शनम् ।
ध्यानं प्रोक्तं प्रवक्ष्यामि सर्वस्माद्योगतः शुभम् ॥
हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः ।
हृदि ज्योतींषि भूयश्च हृदि सर्वं प्रतिष्ठितम् ॥
स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यां तु विष्णुं पश्येद्धृदि स्थितम् ॥
शङ्ख ७.१५-१७ (धर्मशास्त्र ३४९)

एकाकारमना मन्दं बुधरूपमनामयम् ।
सूक्ष्मात् सूक्ष्मतरं ध्यायेज्जगदाधारमुच्यते ॥
आत्मानं बहिरन्तःस्थं शुद्धचामीकरप्रभम् ।
रहस्येकान्तमासीनो ध्यायेदामरणान्तिकम् ॥
यत् सर्वप्राणिहृदयं सर्वेषां च हृदि स्थितम् ।
यच्च सर्वजनैर्ज्ञेयं सोऽहमस्मीति चिन्तयेत् ॥
हारीत ७.५-७ (धर्मशास्त्र १.१०७)

२२

[illegible]

[illegible]

[1]धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
ह्रीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्[1] ॥२२॥[2]

धृति[3] ङः ह्लि निं[4] अम्बॅक् ॥ **क्षमा**[5] ङः कोपशमन्[6] ॥ **दम**[7] ङः शक्ति निं बुद्धि ॥ **अस्तेय** ङः तन् मलिं ॥ **शौच** ङः आचमन-भस्म-स्नानादि[8] ॥ **इन्द्रियनिग्रह** ङः [9]हनं कृतीन्द्रिय[9] ॥ **ह्री**[10] ङः इरं ॥ **विद्या**[11] ङः मङजि ॥ **सत्य** ङः तन् मिथ्या ॥ **अक्रोध** ङः तर् क्नें क्रोध । इक त कबेः दशधर्म[12] ङः ॥

धृति का अर्थ है हृदय की पवित्रता । **क्षमा** का अर्थ है उपशमन । **दम** अर्थात् बुद्धि की शक्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्तेय अर्थात् न चुराना। **शौच** अर्थात् आचमन भस्म स्नानादि। **इन्द्रियनिग्रह** अर्थात् इन्द्रियों पर वश। **ह्री** अर्थात् लज्जा। **विद्या** अर्थात् ज्ञान। **सत्य** अर्थात् मिथ्या न होना। **अक्रोध** अर्थात् क्रोध से आविर्भूत न होना। ये सब दशधर्म कहलाते हैं॥

१-१. क—
धृतिःक्षमादस्तेयम्। शोचं इन्द्रियनिग्रहं।
ह्रिःविद्यसत्यमक्रोधः। देशनन्धर्मलक्षणं॥

ग—
दृतिः क्षमः दमो स्तेयं। शोचंमिन्द्रियविग्रहाः।
ह्रिः वेद्यं। सत्य। मक्रोधो। दशदंधार्म्मलक्षणं॥

२.
चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः।
दक्षलक्षणको धर्मः सेवितव्यः प्रयत्नतः॥
धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥
मनु ६.९१,९२

सत्यमस्तेयमक्रोधो ह्रीः शौचं धीर्धृतिर्दमः।
संयतेन्द्रियता विद्या धर्मः सर्व उदाहृतः॥
याज्ञवल्क्य ३.६६

सत्यं दमस्तपः शौचं संतोषो ह्रीः क्षमार्जवम्।
ज्ञानं शमो दया ध्यानमेष धर्मः सनातनः॥
व्यास (स्मृतिचन्द्रिका १.१४)

सत्यं भूतहितं प्रोक्तं मनसो दमनं दमः।
तपः स्वधर्मवर्तित्वं शौचं सङ्करवर्जनम्॥
संतोषो विषयत्यागः ह्रीरकार्यनिवर्तनम्।
क्षमा द्वन्द्वसहिष्णुत्वमार्जवं समचित्तता॥
ज्ञानं तत्त्वार्थसंबोधः शमः चित्तप्रशान्तता।
दया भूतहितैषित्वं ध्यानं निर्विषयं मनः॥
इति। तथा च धर्मान्तराण्यपि स एवाह—
दानं यज्ञः सतां पूजा वेदधारणमार्जवम्।
एष धर्मः परो ज्ञेयः फलवान् प्रेत्य चेह च॥
भोगेष्वासक्तिरहितं तथैवात्मावलोकनम्।
श्रेयः परं मनुष्याणां कपिलः प्राह पार्थिव॥
सर्वत्र समदर्शित्वं निर्ममत्वमसङ्गिता।
श्रेयः परं मनुष्याणां प्राह पञ्चशिखो मुनिः॥
व्यास (स्मृतिचन्द्रिका १.१५)

क्षमा सत्यं दमः शौचं दानमिन्द्रियनिग्रहः।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया॥
आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनम्।
अनभ्यसूया च तथा धर्मः सामान्य उच्यते॥
विष्णु २.७, ८ (छन्दोगाह्निक पृ.२९)

आनृशंस्यमहिंसा चाप्रमादः संविभागिता।
श्राद्धकर्मातिथेयं च सत्यमक्रोध एव च॥
स्वेषु दारेषु संतोषः शौचं नित्यानुरूपतः।
आत्मज्ञानं तितिक्षा च धर्मः साधारणो नृप॥
महाभारत (कृत्यकल्पतरु १.१०)

दया क्षमानसूया च शौचानायासमङ्गलम्।
अकार्पण्यमस्पृहत्वं सर्वसाधारणानि च॥
बृहस्पति ४८९ (कृत्यकल्पतरु १.११)

सत्यं दमस्तपः शौचं संतोषो ह्रीः क्षमार्जवम्।
ज्ञानं शमो दया दानं एष धर्मः सनातनः॥
महाभारत (कृत्यकल्पतरु १.११)

शौचं दानं तपः श्रद्धा गुरुसेवा क्षमा दया।
विज्ञानं विनयः सत्यमिति धर्मसमुच्चयः॥
देवल (कृत्यकल्पतरु १.११)

धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा।
मित्राणां चानभिद्रोहः सप्तैता समिधः श्रियः॥
महाभारत ५.१४३५ (Ind. Spr. 1338)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षडेव तु गुणाः पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ॥
महाभारत५.१०५१ (Ind.Spr. 3071)
सत्यं दमस्तपो दानमहिंसा धर्मनित्यता ।
साधकानि सदा पुंसां न जातिर्न कुलं नृप ॥
महाभारत ३.१२५३१ (Ind.Spr. 5128)
योगस्तपो दमो दानं सत्यं शौचं दया श्रुतम् ।
विद्या विज्ञानमास्तिक्यमेतद् ब्राह्मणलक्षणम् ॥
वसिष्ठ ६ (धर्मशास्त्र १.४३८)
इज्याचारदमाहिंसा दानं स्वाध्यायकर्म च ।
अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥
याज्ञवल्क्य १.८
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम् ॥
याज्ञवल्क्य १.१२२ (Ind. Spr. 3667)

३. क—धृतिः ।
४. क—इं ।
५. क—क्षम ।
६. क—कोपसमन् ।
७. क—धम ।
८. क—चामनभष्मनधि ।
९-९. क—अनाबृतिन्द्रिय । अगस्त्यपर्व पृ. २७ पंक्ति २३ देखिए ।
१०. क—ह्रिः ।
११. क—विद्य ।
१२: धर्म के लक्षणों के लिए पहला टिप्पण देखिए । सारसमुच्चय ६३, ६९, ७०, ७२ भी दर्शनीय हैं ।

२३



[1]शौचमिज्या तपो दानं स्वाध्यायोपस्थनिग्रहः ।
व्रतोपवासमौनं च स्नानं च नियमा दश[1] ॥२३॥[2]

शौच[3] ङ नित्याशुचि[4] आचमन[5] ॥ इज्या[6] ङ नित्यामूजा[7] ॥ तप[8] ङ अमनॅसि[9] शरीरेन्द्रिय ॥ दान ङ मवेवेः ॥ स्वाध्याय[10] ङ मुच्चारणाकॅन्[11] सोलिः निं अनमनम ॥ उपस्थनिग्रह[12] ङ पन्कृतु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पस्थ[13] ॥ **व्रत** ङ निरामिषादि[14] ॥ **उपवास**[15] ङ निराहार ॥ **मौन** ङ उम्नें ॥ **स्नान** ङ नित्याद्युस्[16] । इक त सपुलु: क्वेःन्य । य त सिनङ्गः[17] नियम ङ ॥

शौच अर्थात् नित्य शुचि होना और आचमन करना। **इज्या** अर्थात् नित्य पूजा करना। **तप** अर्थात् शरीरेन्द्रियों को तपाना। **दान** अर्थात् देना। **स्वाध्याय** अर्थात् सीखे हुए ज्ञान को सिखाना। **उपस्थनिग्रह** अर्थात् उपस्थसंयम। **व्रत** अर्थात् निरामिषादि। **उपवास** अर्थात् निराहार। **मौन** अर्थात् चुपचाप रहना। **स्नान** अर्थात् नित्य स्नान करना। ये दस नियम कहलाते हैं ॥

१-१. क—

शोचमिज्यतपोधनं । स्वध्ययोपस्थनिग्रह ।
व्रतोपवशमोनञ्च । स्नानञ्चानियमः दशः ॥

ग—

शोचमिज्यतपोदनां । स्वदायोपस्तनिग्रहः ।
व्रतोपवषमोदश्च । स्ननञ्च नियमः दशः ॥

२. व्रतिशासन ४ में पांच नियम आए हैं। उन पांच में और इस श्लोक के दस नियमों में केवल शौच का सादृश्य है।

स्नानं मौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः ।
नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादता ॥

याज्ञवल्क्य ३.३१३

शौचमिज्या तपो दानं स्वाध्यायोपस्थनिग्रहः ।
व्रतमौनोपवासाश्च स्नानं च नियमा दश ॥

अत्रि (धर्मशास्त्र १८५)

दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहः ।
व्रतोपवासमौनं च स्नानं च नियमा दश ॥

न्यं व्रत सपुलुः क्वेःन्य । इकं नियम ङरन्य । प्रत्येकन्य । दान । इज्या । तप । ध्यान । स्वाध्याय । उपस्थनिग्रह । व्रत । उपवास । मौन । स्नान । नहन् त अवक् निं नियम। दान वेवेः । अन्नदानादि । इज्या । देवपूजा । पितृपूजादि । तप । कायसंशोषण। कसतन् इकं शरीर। भूशय्या। जलत्यागादि। ध्यान । इकं शिवस्मरण । स्वाध्याय । वेदाभ्यास । उपस्थनिग्रह । कहृतनिं उपस्थ । व्रत अन्नवर्जादि। मौन । वाचंयम । कहृतनिं उजर् । हय्वाकॅचॅक् कुनें । स्नान । त्रिसंध्यासेवन । मद्युस रि काल निं संध्या ॥

सारसमुच्चय २६६

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥

महाभारत (कृत्यकल्पतरु १.९)

३.

वाचा शौचं च मनसः शौचमिन्द्रियनिग्रहः ।
सर्वभूते दया शौचमेतच्छौचं परार्थिनाम् ।

चाणक्यनीतिदर्पण ७.१९

४. क—नित्यशुचि ।

५. आचमन के लिए रामार्चनचन्द्रिका ४०, वीरमित्रोदय २.६३, २८१, छन्दोगाह्निक, नित्य-नैमित्तिककर्मसमुच्चय ४१ उल्लेखनीय हैं।

६. क—इज्य ।

७. क—नित्यपूजा ।

८. देवल (कृत्यकल्पतरु १.१३) में तप की लगभग वही व्याख्या की गई है जो कि कवि टीकाकार ने की है—"व्रतोपवासनियमैः शरीरोत्तापनं तपः।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९. क—अमनसि ।
१०. क—स्वध्यय ।
११. क—मुचरणकॅन् ।
१२. क—उपष्ट° ।
१३: क—पनाङ्तुपस्त ।
१४. क—निरामिषधि ।
१५. क—उपवश ।
१६. क—नित्यद्युस् ।
१७: क—सिनङ्गुः ।

२४

[illegible]

[illegible]

[1]आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवम् ।
ध्यानं प्रसादो माधुर्यं मृदुता च यमा दश[1] ॥२४॥[2]

आनृशंस्य[3] ङ तन् ब्वत् स्तुति[4] ॥ **क्षमा**[5] ङ कोपशमन्[6] ॥ **सत्य**[7] ङ तन् लृत्रोक्[8] ॥ **अहिंसा**[9] ङ तन् पमतिमति ॥ **दम**[10] ङ कशक्तिनिं बुद्धि ॥ **सार्जव** ङ अब्नॅरिं[11] बुद्धि ॥ **ध्यान** ङ उमङॅनङॅन् स्वरूप भटार[12] ॥ **प्रसाद**[13] ङ सिः[14] ॥ **माधुर्य**[15] ङ अमनिस् मोजर् । अमनिस् विनुलतन् ॥ **मृदुता**[16] ङ कददि निं अलृम्बत् । इक त कबेः सपुलुः क्वेःन्य । य त सिनङ्गः यम ङ ॥

आनृशंस्य अर्थात् अनतिस्तुति । **क्षमा** अर्थात् उपशम । **सत्य** अर्थात् झूठ न बोलना । **अहिंसा** अर्थात् न मारना । **दम** अर्थात् बुद्धि की शक्ति । **सार्जव** अर्थात् बुद्धि की ऋजुता । **ध्यान** अर्थात् भटार के स्वरूप का चिन्तन करना । **प्रसाद** अर्थात् दया । **माधुर्य** अर्थात् वचनमाधुर्य और दृष्टिमाधुर्य । **मृदुता** अर्थात् नम्र होना । ये दस यम कहलाते हैं ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१-१. क—
आनृसङ्ग क्षमंसत्यं । अहिङ्ग्ध्यानसार्जवं ।
दानम्प्रसदमाधुर्यं । मृदु(ख—धु)तचयमंदशः ॥
ग—अनृषङ्शसमो । सत्यं । अहिङ्शदाममर्द्धवाम् ।
प्रसानं मधुर्य्यं ध्ययं । मृधुतञ्च । यमो । दशः ॥

२. आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवम् ।
प्रीतिः प्रसादो माधुर्यं मार्दवं यमा दश ॥

न्यं ब्रत इकं इनरनन् यम । प्रत्येकन्य निहन् । सपुलुः क्वेःन्य । आनृशंस्य । क्षमा । सत्य । अहिंसा । दम । आर्जव । प्रीति । प्रसाद । माधुर्य । मार्दव । नाहन् प्रत्येकन्य सपुलुः । आनृशंस्य । सि हरिम्बव । तन् स्वार्थ केवल । क्षमा । सि कॅलन् रिं पनस्-तिस् । सत्य । सि तन् मृषावाद । मनुखे सर्वभाव । दम । सि उपशम व्रुः मितुतुरि मनःन्य । आर्जव । सि दुगदुगाब्नॅर् । प्रीति । सि गॉं करुण । प्रसाद । ह्लि निं मनः । माधुर्य । मनिस् निं वुलत् लवन् वुवुस् । मार्दव । पॅस् निं मनः ॥

सारसमुच्चय २६५

आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवम् ।
प्रीतिः प्रसादो माधुर्यं मार्दवं च यमा दश ॥

शार्ङ्गधरपद्धति (Ind.Spr. 350)

ब्रह्मचर्यं दया क्षान्तिर्दानं सत्यमकल्कता ।
अहिंसा स्तेयमाधुर्ये दमश्चेति यमाः स्मृताः ॥

याज्ञवल्क्य ३.३१२

३. क—अनृशाङ्ग ।
दर्शनीय स्थल —

आनृशंस्यं परो धर्मः क्षमा च परमं बलम् ।
आत्मज्ञानं परं ज्ञानं न सत्याद्विद्यते परम् ॥

महाभारत १२.१२४३३ (Ind.Spr. 3708)

आनृशंस्यं परो धर्मः सर्वप्राणभृतां यतः ।
तस्माद्राजानृशंस्येन पालयेत् कृपणं जनम् ॥

कामन्दक नीतिशास्त्र ३.६ (Ind.Spr. 3709)

अयाचतः सीदतश्च सर्वोपायैर्निमन्तुय ।
आनृशंस्यं परो धर्मः याचते यत् प्रदीयते ॥

हन य व्वं दरिद्र । न्दतन् पमलकु । उपायनिक सकारणन्यन् पमलक्व । अपन् स्यानृशंस्य प्व विशेष निं धर्म ङरन्य । य तिक कत्मु रि कवेहनिं दान रिं अमलकु ॥

सारसमुच्चय १९८

४. क—स्थुति ।

५.
बाह्ये वाध्यात्मिके चैव दुःखे चोत्पातिके क्वचित् ।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्तिता ॥

बृहस्पति (कृत्यकल्पतरु १.१२)

६. क—°समन् ।
संतोषो विषयत्यागो ह्रीरकार्यनिवर्तनम् ।
क्षमा द्वन्द्वसहिष्णुत्वमार्जवं समचित्तता ॥

महाभारत (कृत्यकल्पतरु १.१२)

क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ॥
नरस्याभरणं रूपं रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ॥
क्षमा बलमशक्तानां शक्तानां भूषणं क्षमा ।
क्षमा वशीकृतिर्लोके क्षमया किं न सिध्यति ॥

सुभाषितरत्नभाण्डागार पृ.८३

७. वृद्धचाणक्य में सत्य की माता से उपमा दी गई है—

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया स्वसा ।
शान्तिः पत्नी क्षमा पुत्रो षडेते मम बान्धवाः ॥

वृद्धचाणक्य १२.११ (Ind.Spr. 5132)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥
वृद्धचाणक्य ५.१९ (Ind.Spr. 5134)
सूनृतं सर्वशास्त्रार्थनिश्चितज्ञानशोभितम् ।
भूषणं सर्ववचसां लज्जेव कुलयोषिताम् ॥
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥
गोभिर्विप्रैश्च वेदैश्च सतीभिः सत्यवादिभिः ।
अलुब्धैर्दानशूरैश्च सप्तभिर्धार्यते मही ॥
सुभाषितरत्नभाण्डागार पृ.८३

८. क—ल्ङोक् ।
९. क—अहिङ्ग ।
१०. क—धम ।
सत्यं भूतहितं प्रोक्तं मनसो दमनं दमः ।
तपः स्वधर्मवर्तित्वं शौचं सङ्करवर्जनम् ॥
महाभारत (कृत्यकल्पतरु १.१२)
११. क—अब्नरिं ।
१२. क—भडार ।
१३. क—प्रसद ।
१४. क—हसिः । हसिः के पश्चात् लोन्तार में विराम नहीं है ।
१५. क—मधुर्य्य ।
१६. क—मृधुता ।

२५

[illegible]

[illegible]

[1]दश स्थानानि धर्मस्य ये पठन्ति द्विजातयः ।
अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम्[1] ॥२५॥[2]

क । हन सिर द्विजाति मनमकॅन् स्थान निं दशधर्म । इनजि निर । अत्हॅर् तिनूतिरं[3] दशधर्म । सिर त उमङ्गुहकॅन् परमगति । अनॅम्वकॅन् सं ह्यं कभुजङ्गन् ॥ निहन् वरवरः भटार महेश्वर । योग्य हिडॅपॅन् ॥

जो द्विजाति दस धर्मस्थानों को प्राप्त करते हैं, उनका अध्ययन करते हैं और उनका सदैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुसरण करते हैं वे परमगति पाते हैं तथा व्रतित्व को प्राप्त करते हैं। भटार महेश्वर के ये उपदेश ध्यान देने योग्य हैं ॥

१-१. क—
दश स्थानानि धर्मस्य। ये पतन्ति द्विजजतयः।
अदित्यसा (घ—°चा°) नुवर्त्तन्ते। ते यान्सि
(ख—न्ति) परमङ्गतिम्।

ग—
दशस्थानानि। धर्म्मस्य। पटन्ति। त द्विजातयः।
अदित्य। चा। नुवार्त्तन्ते। यो। यान्ति परम।
ङ्गतिम् ॥

२. दश लक्षणानि धर्मस्य ये विप्राः समधीयते।
अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ॥
दशलक्षणकं धर्ममनुतिष्ठन् समाहितः।
वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ॥
मनु ६.९३, ९४

३: क—°र।

२६

[illegible]

[illegible]

[1]सत्यं व्रतं तपो वापि तत् सर्वं निष्प्रयोजनम्।
ज्ञानतुष्टनिःस्पृहेषु शान्तजीवितसात्मकम्?[1] ॥२६॥

क। इकं व्रत गवयक्न। अक्वेः ल्विर्न्यं। असिं सकह्यन्त व्रत। पुष्पसात्त्विक। [2]मग्लृमपूजा। जाग्रसात्त्विक[3]। मग्लृमतङहि। ज्ञानसात्त्विक।[2] मग्लृमङस्तुति॥ ङूनिवेः यन् व्रुहें कयोगीश्वरन्। म्वं इकं तप। यतिक कशान्तन्[4] ङ॥ इकं तपव्रत कबेः। हय्वेनिष्टि[5] फलन्य। सुख[6] निं मनः जुग

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कगवयक्न रि स्डॅङि तपव्रत । सलवस् निं हुरिप्त ॥ कुनं इकं मह्युनिं फल निं तपव्रत इक । पाप यन् मङ्कन ॥ नहन् लि भटार महेश्वर । कयत्नक्न त्मॅन्त्मॅन् ॥ ० ॥

[७]निहन् वरवर:[७] भटार शङ्कर केङॅतन्[८] ।

अर्थात् करने योग्य व्रतों की संख्या बहुत है जिन्हें तुम करना चाहते हो । पुष्पसात्त्विक अर्थात् पूजा की इच्छा, जाग्रसात्त्विक अर्थात् जागृत रहने की इच्छा, ज्ञानसात्त्विक अर्थात् स्तुति करने की इच्छा । तथा च योगीश्वरत्व और तप को जानना ही शान्तता है । इन तपव्रतों के फल की इच्छा न करे । जीवनभर तपव्रत करते समय सुखमनस्क होवे । यदि तपव्रत के फल की इच्छा करता है तो वह पापी है । भटार महेश्वर के इन वचनों का यत्नपूर्वक पालन करे ।

भटार शङ्कर के निम्न उपदेश का ध्यान रखना चाहिए ।

१-१. क—
सत्यव्रतितपोवपि । तन्सर्व्वनिस्प्रयोजनं ।
ज्ञानतुष्टनिसुप्रेषु । शन्त:जिवितसात्मकं ॥

२-२. घ में नहीं है ।

३. क—जग्रसत्विक ।

४. घ—कशक्तन् ।

५. फल की कामना किए बिना कर्म करता रहे इसका निरूपण श्रीकृष्ण ने गीता में किया है—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥
विहाय कामान् य: सर्वान् पुमांश्चरति नि:स्पृह: ।
निर्ममो निरहंकार: स शान्तिमधिगच्छति ॥
युक्त: कर्मफलं त्यक्त्वा शान्तिं प्राप्नोति नैष्ठिकीम् ।
अयुक्त: कामकारेण फले सक्तो निबध्यते ॥
काम्यानां कर्मणां न्यासं संन्यासं कवयो विदु: ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणा: ॥
गीता २.४७, ७१, ५.१२, १८.२

६. तपव्रत करते समय व्रती प्रसन्नचित्त तथा सुखी होना चाहिए । प्रसन्नचेतस् की बुद्धि स्थिर रहती है—

प्रसादे सर्वदु:खानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धि: पर्यवतिष्ठते ॥
गीता २.६५

७-७. क—निहन् वने: वर:वर: ।

८: क—केङतक्न ।

२७

[illegible]

[illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



[1]यथा भास्करचन्द्रयोरहोनक्तं समं द्युतिः ।
तद्वद् गमनं भिक्षोश्च हृदयं न विवर्जितम्[1] ॥२७॥[2]

क । इकं अम्बॅक् समता[3] । यतेक पकाम्बॅकन्त[4] विकु ॥ निहन् दृष्टान्त । कद्यङ्ग निं सं ह्यं चन्द्रादित्य । सुमुलुः रिं[5] रात् कबेः । सल्विरिं स्थावर जङ्गम कनिष्ठमध्यमोत्तम, हल हयु, [6]सुख दुःख[6], शुचि चम्पुर्, अब्व वङि पड तिनेजन्[7] दे निर । हीनस्पर्श[8] निं शरीर तन् हन पहिनिक ॥ एव[9] मङ्कन ताम्बॅकन्त विकु । [10]हय्व अङकु[10] पङव्रुः । म्वं सर्वगुण । हय्व कलिप्यन् देनिं त्रिमल[11] । सत्त्व रजः तमः ॥ मङ्कन लिं भटार शङ्कर । कयत्नक्न त्मॅन् ॥

निहन् वरवरः भटार शम्भु केङॅतक्न ।

